वर्षम् 72
अङ्कः -06-07
चैत्र-वैशाखमासौ
विक्रमाब्दः 2079
युगाब्दः 5124
अप्रेल-मई, 2022

ISSN 2249-698X

# भारती
## संस्कृत-मासपत्रिका


एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख

## भारतीय-नव-वर्ष विशेषाङ्कः




सम्राजा विक्रमेणाऽब्दगणनेयं प्रवर्तिता।
ब्रह्मणः सृष्टिमाधृत्य युगाब्दः स्मर्यते सदा।।


NARSI®
DEFINING SPACES INTO
MASTERPIECES
Meeting Pods & Work Stations
Customized Furniture
Wooden Linear Acoustic Panels
Wooden Fire Doors
A wide range of Premium Furniture Products in Modular, Knock down and Prefab forms.
State-of-the-art manufacturing facility with cutting-edge technologies
A one-stop Interior fit-out provider with a pan India presence


भारतीय नववर्ष की हार्दिक शुभकामनाओं सहित :-
आज़ादी का अमृत महोत्सव
आज़ादी का अमृत महोत्सव
भारतीय जनता पार्टी,
किशनपोल विधानसभा, जयपुर
ललिता जायसवाल
पार्षद, वार्डनं. 72, नगर निगम हैरिटेज, जयपुर
संजय जायसवाल
पूर्व प्रदेश मीडिया प्रभारी
भारतीय जनता युवा मोर्चा, राजस्थान
/bjpsanjayjaiswal1
/bjpsanjayjaiswal1
/bjpsanjayjaiswal1

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ७ |
| २ | नववर्षस्य प्रथमा प्रतिपदा | पण्डित अनन्तशर्मा | ९ |
| ३ | संवत्सरः | डॉ. नाथूलालसुमनः | १४ |
| ४ | नववर्षमभिलक्ष्य किञ्चित् | डॉ. गीता शुक्ला | १७ |
| ५ | कारुण्यप्रकर्षः | डॉ. सत्यव्रत वर्मा | १८ |
| ६ | श्रीदुर्गाष्टकम् | आचार्यः पं. नथमलशास्त्री दाधीचः | २० |
| ७ | जयति जगति देवी सच्चियायाम्बिकेशी | डॉ. हरिसिंहराजपुरोहितः 'राजहरि' | २१ |
| ८ | श्रीराघवेन्द्रकविरचितराधामाधवनाटकम् | डॉ. सुरेन्द्रकुमारशर्मा | २२ |
| ९ | आयुर्वेदस्योपादेयता | वैद्यो हरिशरणशाण्डिल्यः | २४ |
| १० | भारतभानुर्भासते | डा. प्रद्युम्नशर्मा | २५ |
| ११ | श्रीमद्भागवतपुराणस्य काव्यात्मकसौन्दर्यम् | डॉ. योगिनी एच्. व्यास | २६ |
| १२ | भावनिर्झरी | डॉ.अञ्जना शर्मा | २८ |
| १३ | कलौ भागवती कथा | युगलकिशोरभारद्वाजः | ३१ |
| १४ | विरोधः, उत्सवः, बकासुरः | डॉ. हर्षदेवमाधवः | ३३ |
| १५ | स्मृतिग्रन्थेषु पर्यावरणचिन्तनम् | कैलाशचन्द्रबुनकरः | ३६ |
| १६ | श्रीदुर्गासप्तशत्यामनुप्राससर्जना | डॉ. रजनीशकुमारबारहठः | ३९ |
| १७ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | ४० |
| १८ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | ४२ |
| १९ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ४५ |
| २० | संस्कृत-समाचाराः | | ५३ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

दूरभाषः 0141-2379014, मो. 9799011085

(धनादेश/चैक/ड्राफ्ट केवल "भारतीय संस्कृत प्रचार संस्थान" के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

पत्रिकाप्रकाशनेऽधिगतमार्थिकं सौजन्यं राजस्थान-संस्कृत-अकादमीतः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -06-07
चैत्र-वैशाखमासौ
विक्रमाब्दः 2079
युगाब्दः 5124
अप्रेल-मई, 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

॥ श्री रामानन्दाचार्याय नमः ॥ ॥ वेदोऽखिलोधर्ममूलम् ॥ ॥ श्री अग्रदेवाचार्याय नमः ॥

॥ श्री जानकीवल्लभो विजयतेतराम् ॥

# स्वामी ( डॉ. ) राघवाचार्य वेदान्ती अग्रपीठाधीश

अध्यक्ष:
श्री जानकीनाथ बड़ा मन्दिर ट्रस्ट
रैवासाधाम, सीकर ( राज. )
दूरभाष : आचार्य पीठ : 01572-222025
संस्कृत विद्यापीठ : 01572-222683
चलदूरभाष : 94140-37679, 9929075620

अध्यक्ष:
श्री जानकीनाथ वेद विद्यालय
रैवासाधाम, सीकर ( राज. )

अध्यक्ष:
श्री अग्रदेवाचार्य संस्कृत विद्यापीठ
रैवासाधाम, सीकर ( राज. )

पूर्व अध्यक्ष:
राजस्थान संस्कृत अकादमी
ई.-179, रमेश मार्ग
सी-स्कीम, जयपुर
दूरभाष : 0141-2223452


क्रमांक : दिनांक 14/04/2022

श्रीमान् सुदामा जी शर्मा

सप्रेम हरिस्मरण,

संस्कृत मास पत्रिका निरन्तर 72 वर्षों से अनेक ज्ञानपयोगी स्तम्भों के माध्यम से संस्कृत प्रेमियों का ज्ञान संवर्धन कर रही है। आगामी अंक हिन्दु नववर्ष विशेषांक के रूप में प्रकाशित होने वाला है। हिन्दुत्व में ही संवदेनशील जीवन, विश्व की मंगलकामनाऍं तथा उदात्त चरित्र समाहित है, निश्चित रूप से यह अंक हिन्दुत्व के संबंध में सारे भ्रमों को शांत करेगा। तदर्थ मेरी कोटिशः मंगलकामनाऍं प्रेषित हैं।

शुभेच्छु

(डा. स्वामी राघवाचार्य वेदान्ती)

सम्पादकीयम्

# 'नलः' संवत्सरो भूयाज्जगतां सुखकारकः

...✍ प्रोफेसर श्रीकृष्णशर्मा

चैत्रमासस्य प्रथमो दिवसश्चैत्रशुक्ला प्रतिपत्तिथिरेव युगादिः नववर्षो मन्यते। अस्मिन्नेव दिवसे विश्वसृष्टिः सञ्जातासीद्।'ॐ तत्सद् अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथम-चरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे बौद्धावतारे आर्यावर्तैकदेशान्तर्गते (अमुक) देशे-क्षेत्रे-स्थाने, विक्रमसंवत्सरे, (अमुक) नाम्नि संवत्सरे, (अमुक) अयने-ऋतौ-मासे-पक्षे-तिथौ-वासरे ... कर्म करिष्ये / करिष्यामि' इत्येवं सङ्कल्पवाक्येन प्रतिदिनं भारतीयपरम्परायां कर्म समारभमाणो लोकः सप्रमाणं युगमानं बोधयति। एतादृशी प्रामाणिकी कालगणना भारतवर्षादन्यत्र विश्वस्मिन् भूतले (जगति) न कुत्रापि क्रियते,कर्तुमपि न पार्यते। अत्र सङ्कल्पवाक्ये प्रयुक्तविशिष्टशब्दानां साङ्केतिकः परिचयः प्रस्तूयते, तथा हि -

**संवत्सरः** - सम् (सम्यग्) वसन्ति (ऋतवः) अस्मिन् इति। अत्र 'सम्' उपसर्गपूर्वकाद् 'वस्' धातोः 'वसेश्च' (3.71) इत्युणादिसूत्रेण 'सरन्' प्रत्ययः। 'सः स्यार्धधातुके' (पा. 7.4.49) इति सूत्रेण 'वस्' धातुगत-सकारस्य तकारः। संवत्सरोऽब्दः (वर्षः)। सम्प्रति प्रभवादि-क्षयकृदन्तेषु षष्टि-संख्यकाब्देषु **नलो**ऽभिधो वर्षः (संवत्सरः) पञ्चाशत्तमः। 'नल् भासार्थे' इति धातोः पचाद्यचि 'नल' शब्दो व्युत्पन्नो वर्तमानसंवत्सरस्य देदीप्यमानतां सङ्केतयति, **'वत्सराः सृष्टिराख्याताः नामतुल्य-फलप्रदाः'** इति ज्योतिश्शास्त्रोक्तेः।

**संवत्** - सम् (सम्यग्) वयते, निरन्तरं गच्छतीत्यर्थः। 'सम्' उपसर्गपूर्वकाद् 'वय् गतौ' धातोः 'क्विप् चे' ति (पा. 3.2.76) सूत्रेण क्विपि, 'लोपो व्योर्वलि' इति (पा. 6.1.66)सूत्रेण यलोपे, क्विपः सर्वापहारिलोपे, 'ह्रस्वस्य पिति कृति तुक्' (पा. 6.1.70) इत्यनेन तुकि 'संवत्' इति निष्पन्नः। ईशवीयाब्दतः 57 वर्षपूर्वतनो विक्रमादित्यप्रवर्तितः संवत् 2079 तमः समारब्धोऽधुना।

**कलियुगः** - चत्वारो युगाः भवन्ति - सत्ययुगः (1728000 मानव-वर्षात्मकः), त्रेतायुगः (1296000 वर्षात्मकः), द्वापरयुगः (864000 वर्षात्मकः) कलियुगः (432000 वर्षात्मकः)। इत्थं 4320000 मानववर्षाणाम् एका चतुर्युगी भवति। सत्य-त्रेता-द्वापर युगातीतानन्तरमधुना कलियुगस्य 5124 तमो वर्षः समारब्धः। स च कलियुगस्य प्रथमचरणः।

**मन्वन्तरम्** - ब्रह्मण एकस्मिन् दिवसे चतुर्दश मनवो भवन्ति। स्वायम्भुवः, स्वारोचिषः, औत्तमिः, तामसः, रैवतः, चाक्षुषः, एते षड् मनवो व्यपगताः। सप्तमो वैवस्वतो मनुः सम्प्रति प्रचलति। अतश्चोक्तं संकल्प वाक्ये 'सप्तमे वैवस्तमन्वन्तरे' इति। 'सार्वर्णिमन्वादयः सप्त अग्रे भवितारः। चतुर्युगाणाम् एकसप्ततितोऽपि किञ्चिदधिकम् एकं मन्वन्तरम्भवति। उपर्युक्तदिशा 6×4=24+3 = 27 युगाः व्यतीताः, अष्टाविंशतितमोऽयं युगः प्रचलति।इत्थं **सप्तमश्चायं ब्रह्मा** वर्तते।

**ब्रह्मणोऽहः** - चतुर्युगाणां सहस्रं ब्रह्मणोऽहन् = कल्पो वा (दिवसः) भवति। तस्य पूर्वार्धः व्यतीतः अर्थाद् ब्रह्मण आयुषः पञ्चाशद् वर्षाणि व्यतीतानि। सम्प्रति **एकपञ्चाशत्तमवर्षस्य प्रथमो दिवसः** प्रचलति। कलियुगस्य च 5123 वर्षाणि व्यतीतानि, 5124 तमो वर्षः, वैक्रमाब्दस्य 2079 तमस्य चैत्रशुक्लप्रतिपत्तिथौ 02 अप्रेल 2022 ईशवीयाब्दतः समारब्धः।

**कल्पः** - ब्रह्मणः शतवर्षात्मकमायुर्भवति। पञ्चाशद्वर्षान्ते **'पाद्म'** नामा महाकल्प आसीद्। अधुना च तदायुषः परार्धे **'वाराह'** नामा कल्पः प्रवर्तते। श्वेतवराहरूपं धृत्वा तोयान्तःस्थां महीं ज्ञात्वा तदुद्धारं कर्तुकामः प्रजापतिः ब्रह्मा तामुद्धृतवान्, अतश्चायं **वाराहकल्पः**। चतुर्युगीनां सहस्रम् ब्रह्मणः कल्पो भवतीत्युक्तमेव। कल्पद्वयं ब्रह्मणोऽहोरात्रम्भवतीत्यपि ज्ञेयम्।

सर्वमेतद् अस्मिन् **नववर्षविशेषाङ्के** विततेन ज्ञातुमर्हन्ति पाठकाः। विशेषतः पुराणविद्याविशारदानां **पण्डितअनन्तशर्मणाम्,** अथ च **डॉ. नाथूलाल-सुमनसां** लेखयोर्विततो विचारः।

भारतीयपरम्परायामित्थम्भूतं विलक्षणम् प्रामाणिकम् ऐतिह्यज्ञानं भारतीयानां कृते गर्वानुभूति-करमिति वयं सौभाग्यशालिनः। भारतीया संस्कृतिरेषा सर्वैरपि प्राणपणेन संरक्षणीया। सम्प्रति समस्तेऽपि विश्वे वैज्ञानिकास्त्रशस्त्राणां यादृशी जगद्विध्वंसिनी विभीषिका स्पर्धायते सा भारतीय-सज्ज्ञान-विज्ञानेनैव संरक्षितुं शक्या। परमेश्वरं कामये विश्वशान्तिकरोऽयं **नलाख्य**संवत्सरो भूयादथ च भारतवर्षस्य कृते प्रतिष्ठापको भवेदिति

मङ्गलाभिलाषुकः

**- सम्पादकः**

**व्याकरणपीठाध्यक्षचरः,**

**जगद्गुरु-रामानन्दाचार्य-**

**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्,**

**दूरभाषाङ्कः 8386943655**

# नववर्षस्य प्रथमा प्रतिपदा

❑ पण्डित अनन्तशर्मा

चैत्रमासस्य शुक्लपक्षीया प्रतिपदेव वर्षप्रतिपदा उच्यते। इयमस्मभ्यमत्यन्तं महत्त्वपूर्णास्ति, केवलमेतस्मादेव न, यन्नववर्षारम्भस्यायं प्रथमो दिवसः, अपितु अयं **विश्वसृष्टेः** प्रथमो दिवसोऽस्ति। सृष्टेः प्रथमदिवसत्वादेतदीयं सर्वोपरि महत्त्वं कालविज्ञानदृशा वर्तते यद्विश्वस्य न केनचिदपि राष्ट्रेणाद्यावधि विज्ञातम्। अस्य घोषणा मान्यता वाऽपि तच्चिन्तनाद्दूरीभूता। अस्तु अस्मिन् प्रसङ्गे एतत्सन्दर्भिता कालज्ञानविषयका केचन बिन्दवोऽवश्यं ध्यातव्याः द्रष्टव्याश्च।

भारतीयवर्षावयवविषयकविचारेण वयं दिवानक्त-पक्ष-ऋतु-अयनादीन् पञ्चोपागमान् वर्षावधि-पर्यन्तं प्राप्नुमः। एकस्मात्सूर्योदयादग्रिमसूर्योदय-पर्यन्तिको यः कालावधिः स. **दिवस** इत्युच्यते। गणना सामान्येनास्य दिवसत्वावधेः **'सावनदिनम्'** इत्यपरा आख्या। अस्य दिवसस्य द्वौ समौ भागौ। तयोः सूर्यस्य संस्थित्या युतोभागोऽहरुच्यते। सूर्यावस्थितिविरहितो भागो रात्रिरिति कथ्यते। उभयोः संयुक्तकालावधिः **'अहोरात्र'** इति संज्ञयापि व्यवह्रियते।

### पक्षमासौ

पक्षौ मासस्य घटकौ। द्वयोः पक्षयोरेको मासः। एवं चेत् पक्षः स्वतः पञ्चदशदिवसात्मको लक्ष्यते। तत्र प्रथमः शुक्लपक्षः अपरः कृष्णपक्षः। अस्य विभाजनस्य प्राकृतिक आधारश्चन्द्रमा अस्ति। चन्द्रमसः स्वरूपं आनुक्रमिकं वर्धते क्षीयते च। अस्य पूर्णवृद्धेर्दिवसः **पूर्णिमे**त्युच्यते। वृद्धेरयमन्तिमो दिवसः। अयं वृद्धिकालः प्रकाशमयत्वात् शुक्लसंज्ञः। शुक्लपक्षसम्पूर्तेरनन्तरीयः प्रथमो दिवसः चन्द्रह्रासारम्भस्य प्रथमो दिवसोऽस्ति। अयं ह्रासोऽपि पञ्चदशदिवसावधिः प्रचलति। अस्यान्तिमो **दिवसोऽमावास्येत्याख्यः**। अस्मिन्दिवसे चन्द्रमाः किञ्चिदपि न दृश्यते। उत्तरोत्तरमन्धकार-समर्धका एते दिवसाः कृष्णसंज्ञका उच्यन्ते। अन्धकारः कृष्ण एव भवति, अतः पञ्चदिवसात्मको रात्रिकालः तमो बाहुल्यात्कृष्णपक्षः कथ्यते। इमावुभावेव पक्षौ मासस्य घटकौ मन्येते। चन्द्रमसः एव 'मास्' (माः) इत्यपरं नाम। मासा दृष्टत्वादयं कालः **मास** इति व्यवह्रियते। मास एव हिन्द्याद्यन्यान्यभाषासु **'माह'** इति निगद्यते।

### मासर्त्तू

मासा एव ऋतूनुद्भावयन्ति। मासद्वयात्मककाला-वधिरेकर्तुकालः। एवं चेद्वर्षे साकल्येन षडर्त्तवः सम्भवन्ति। वर्षस्य प्रथमो मासः चैत्रः। अस्मादेव मासगणना प्रारभ्यते। तत्र मासानां क्रमशः चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्विनः (आश्वयुज्वा), कार्त्तिकः, मार्गशीर्षः (आग्रहायणो वा), पौषः, माघः फाल्गुनश्चेति नामानि।

अनेनैव क्रमेण मासद्वयस्यैकैकस्य ऋतोः क्रमः प्रवर्तते। तद्यथा चैत्रवैशाखयोः वसन्तः। ज्येष्ठाषाढयोः ग्रीष्मः। श्रावणभाद्रपदयोः वर्षा। आश्विनकार्तिकयोः शरद्। मार्गशीर्षपौषयोः शिशिरः। माघफाल्गुनयोः हेमन्तश्च। वेदेषु वसन्तस्य नाम **मधु** ग्रीष्मस्य च **माधव** इत्यप्यस्ति। एवमेवासामप्यन्यान्यान्यनेकानि नामानि सन्ति। एतानि नामान्येव लोकभाषासु विविधरूपेषूप-लभ्यन्ते येन विज्ञायते यदेताः सर्वा लोकभाषाः संस्कृता-देवाविर्भूताः।

### ऋत्वयने

आनुक्रमिकं त्रिभिः ऋतुभिरेकमयनं सम्भवति। एवं चेद्वर्षेऽयनद्वयस्य संस्थितिर्विज्ञायते। अयनशब्दस्यानेकेऽर्थाः, तेष्वेको मार्ग इति। अयं मार्गः सूर्यस्यैव। यथा पश्यामो वयं यत्सूर्यस्य गतिः पूर्वतः पश्चिमं भवति। इदमपि स्फुटं दृश्यते यदेकस्मिन् काले सूर्यस्यावनमनम् उदीच्यां जायमानं प्रतीयते किन्तु अपरस्मिन् काले इदमवनमनं दक्षिणस्यां जायमानं प्रतीयते। अनेनावनमनेनैव सूर्यस्य गतेर्दिगनुमीयते। अतः सूर्यस्य उदक्गतिरेवोत्तरायणसंज्ञकोक्ता। इयमेव गतिर्दक्षिणस्याश्चेद्दक्षिणायनसंज्ञकोच्यते।

### वर्षः

अयनद्वयात्मको वर्षो भवति। तत्र उत्तरायणं सूर्यस्य दिवसः। दक्षिणायनं च तस्य रात्रिः। सूर्यः यस्मात्स्थानात् प्रस्थानं कृतवान् तदेव स्थानं पुनः प्रयातुं यः कालावधिः स एव सूर्यस्याहोरात्रम्। सूर्यस्येदमहोरात्रं तदीयाकाशीय-गत्यां निर्भरमस्ति। द्यवि सम्पद्यमानत्वाद्दिव्याभिधमुच्यते।

अस्तु, वयं सम्यग्विज्ञातुं शक्नुमो यद्दिव्यमहोरात्रमस्माकं वर्षस्य **षष्ट्युत्तरशतत्रयगुणितं** (360) कथं भवति। एवमेवास्माकं वर्षोऽपि षष्ट्युत्तरशतत्रयदिवसात्मक एव कथं भवतीति अवबुध्यते।

### सावनवर्षः

यथा पूर्वमुक्तं यदेकसूर्योदयादग्रिमसूर्योदयं यावत्कालावधिः नित्यमनुभूयमानः सावन-अहोरात्रमुच्यते। अस्य विषयमवबोद्धुमावश्यकं प्रतीयते।

सूर्येण सम्बद्धस्यास्य अहोरात्रस्य 'सावन' इति संज्ञा सवनात् कृता। **सवनमिति यज्ञप्रक्रियायाः परिपूर्णतायाः नाम।** एकाह-द्व्यहन्यज्ञादीनां विविधयज्ञानां गणना सवनादेव विधीयते स्मेति कारणादयं दिवसः सावन इत्युक्तः। एवं चेत्सावनशब्दस्यार्थोऽस्ति **सवनेन साध्यः** सवनेन सम्बद्धो वा।

एतादृशानां त्रिंशत्सावनदिवसानां समष्टिः **सावनमास** उच्यते। सावनमासानां द्वादशावृत्तयः **सावनवर्षकालः**। भाविकालगणना एभिः सावनवर्षैः सम्भवतीति व्यवहाराय सावनवर्ष इत्येका इकाई (अन्वितिः) अभिमता।

### चान्द्रवर्षः

सामान्यतया ग्रहाणां सूर्य चन्द्र मंगल बुध गुरु शुक्र शनिपृथिवीनां नक्षत्रदृशा परिक्रमणव्याप्तिः परिक्रमणमार्गश्च तुल्यमेव। अयं मार्गः **नक्षत्रपथ** इत्युच्यते। नक्षत्राणि **सप्तविंशतिः** सन्ति। नक्षत्रपथ्यस्मिन् सर्वेषाममीषां भिन्ना गतिः। तथा हि चन्द्रः एकस्मिन् दिवसे एकं नक्षत्रमतिक्रामति। अयमेव चन्द्रमसः एको दिवसः। सम्पूर्णनक्षत्रातिक्रमणे सप्तविंशतिदिवसानां कालो व्यत्येति। अयमेव **चान्द्रमासः**। एतादृशां द्वादशचान्द्रमासानामेको वर्षश्चान्द्रवर्ष उच्यते। इदं सामान्यं स्थूलमानम्।

एवं **सौर चान्द्र नाक्षत्र सावन** संज्ञकाश्चतुर्विधमार्गाः भारतीयज्योतिषशास्त्रे व्यवहृताः सन्ति। भारतीयपञ्चाङ्गे चतुर्विधदिवसमासवर्षाणां सामंजस्यपूर्वकं वर्षपत्रिका निर्मीयते। सामंजस्ये तिथिः वारः नक्षत्रं योगः करणञ्चेति **पञ्चाङ्गानि** प्रमुखानि सन्ति। अतएवास्याभिधानं **पञ्चाङ्गमिति**। केवलं चन्द्रमेवाधारं कृत्वा वर्षगणनायु-तायां यवनवर्षपत्र्यां एतादृशसामंजस्याभावात् दृश्यते यत्तदीयवर्षस्य प्रथमो मासः **'मोहरम्म'** न ऋतुसाहचर्येण प्रारभ्यते। कदाचित् शीतर्तौ कदाचिद् ग्रीष्मे कदाचिच्च वर्षायाम्।

एवमेव **ईशवीयाब्दं** पश्यामः। भूभ्रमणाधारेण अहोरात्रकालमानेन तत्र ३६५ दिवसात्मको

वर्षोऽभिमतः। फर्वरीमासे २८ दिवसा भवन्ति। वर्षचतुष्ट-यान्तरालं २९ दिवसा भवन्ति। इति तद्गणना विद्यते। सामान्यतया ३६५ दिवसात्मको वर्षः स्वीक्रियेत चेत् अस्माकं युगमाने प्रायः ६०० वर्षाणामन्तरं स्यात्। प्रारम्भे तदीयवर्षः दशमासात्मक एव आसीत्। तदा मासनामान्यासन् जैन्युअरि, फेब्रुअरि, मार्च, एप्रिल, मे, जून, सेप्टेंबर, ऑक्टोबर, नवम्बर, दिसम्बर चेति। नवम्बर शब्दे संस्कृतोक्त 'नवम्' इत्यस्य, दिसम्बर शब्दे संस्कृतोक्त 'दशम' इत्यस्य पदोच्चारणस्य स्फुटा प्रतीतिर्भवति। पश्चात् **जूलियस** सीजरस्य शासनकाले कालचिन्तनेन परिमार्ष्टिः संजाता। 'जूलियस' इति नाम्न आधारेण 'जुलाई' तात्कालिक **सेंट आगस्टाइनस्य** नाम्न आधारेण 'अगस्त' इति मासद्वयं योजितम्। एवं तत्र द्वादशमासक्रमः सम्पन्नः। किन्त्वस्यां वर्षपरम्परायां व्यतीतवर्षसंख्यानां गणनाक्रमज्ञानस्य न काचिदपि व्यवस्था विहिता लक्ष्यते यया वर्ष - समष्टिकृते काप्यभिख्या प्रचलिता भवेत्।

भारतवर्षे तु कालमानस्यानेका अभिख्याःसन्ति याः युगाब्दान्निर्दिशन्ति। यथा **सप्तर्षि** संवत्, **बृहस्पति** संवत्। एतादृश्याभिख्यया सप्तर्षियुगस्य बार्हस्पत्ययुगस्य वर्षगणना सम्भाव्यते।

## युगाब्दगणनाविज्ञानम्

भारतीयपरम्परायां प्रचलितस्य संकल्पवाक्यस्य ('ओं तत्सदिति ब्रह्मणो' इत्यादेः) कालबद्धोंऽशः सप्रमाणं वाक्यसम्पूर्त्या सह युगमानं निर्दिशति बोधयति चास्मिन् दिवसेऽहं कार्यमिदं कुर्वाणोऽस्मि।

ब्रह्मा सर्वेश्वरेण विष्णुना प्रेरितः सम्प्रति कर्मणि प्रवृत्त आस्ते। स च **सप्तमो ब्रह्मा**ऽस्तीत्यनेन गतब्रह्मणां बोधो भवति। साम्प्रतिकस्य ब्रह्मणोऽपि पूर्वः परः अर्थात् तदीयानि **५० वर्षाणि** व्यतीतानि। वर्तमान-तदीय **नववर्षस्य प्रथमो दिवसः श्वेतवाराहकल्पोऽस्ति**। अस्यापि दिवसस्य षड् मन्वन्तराणि व्यतीतानि। सप्तमो मन्वन्तरः प्रवर्त्तमानोऽस्ति। अस्य मन्वन्तरस्य सप्तविंशतिः युगा व्यतीताः। **अष्टाविंशतितमो युगः प्रवर्तते**। अस्यापि अष्टाविंशतितमस्य युगस्य त्रयः पादाः समाप्ताः। चतुर्थःपादः कलियुगः प्रवर्तमानो वर्तते। एतत्सर्वं वयं विवक्षिष्यमाणाः यतः कलिरयं ४३२००० वर्षात्मको विद्यते।

शाश्वतिकवर्षमानस्मृत्यर्थं द्वापरपर्यन्तं कल्प-गणनया विगतवर्षमानरूपे १९७२९४४००० वर्षाणि ज्ञातव्यानि। एतानि कल्पानि द्वापरान्तानि वक्तव्यानि व्यवहर्तव्यानि च।

अथ कलियुगारम्भदिवसात् गतकलिवर्षमानज्ञानाय वर्तमान शकसंवत् ३१७९ संख्या योज्या। प्राप्तं योगफलं कलेर्गताब्दान् बोधयति। तद्यथा-1944+3179 = 5123 गतकलियुगाब्दाः। एतान् द्वापरान्तकलिवर्षैः सह योजयेत चेत् कल्पादितः वर्तमानाब्दाः प्राप्यन्ते। यथा-1972944000+5123 = 1972949123 वर्षाणि। विश्वे कुत्रापि एतादृशवर्षमानज्ञानसाधनं नान्यत्रोपलभ्यते। संकल्पेनैव विश्वसृष्टिकालविज्ञापनाधारः, वर्षमानमिदम्। यदि कल्पाब्दगणनातः सृष्टिसर्जनाब्दानां हानं क्रियते तर्हि सम्प्राप्ता अब्दाः सृष्टिसंवतो गताब्दा जायन्ते। यथा - 1972949122-170640=1972778482 वर्षाणि। कतिचिद्वर्षपूर्वपर्यन्तं भारतीयपंचाङ्गेषु कल्पाब्दाः सृष्ट्यब्दाश्च उल्लेख्यमाना आसन्।

## युगमानम्

सावनवर्षाणां समष्टेरेका इकाई **युग** इत्याख्याऽभि-मता। अस्यां 4320000 वर्षाणि भवन्ति। व्यवहार-

सौविध्यायेयं चतुर्षु भागेषु विभाजिता । तत्र वर्षसंख्यासु तुल्यता नास्ति। एषां भागानां (युगपादानां) क्रमो वर्ष-संख्या च निम्नानुसारं दर्श्यते-

सत्यपादः (सत्ययुगाख्यः प्रथमः पादः)= 1728000 वर्षाणि

त्रेतापादः (त्रेतायुगाख्यः द्वितीयः पादः)= 1296000 वर्षाणि

द्वापरपादः (द्वापरयुगाख्यः तृतीयः पादः)= 864000 वर्षाणि

कलिपादः (कलियुगाख्यः चतुर्थः पादः)= 432000 वर्षाणि

युगांशत्वादमीषां चतुर्णां पादानामपि युगसंज्ञा एव प्रचलिता। पादमानानां तुल्यत्वे तु चतुर्थांशः 1080000 वर्षाणि स्युःकिन्तु एवं नास्ति। अस्य कारणमस्ति धर्मह्रासपरायाः कालगणनायाः क्रमे वैभिन्यम्।

### पादस्थितिकालविषये विशेषः

धर्मस्य स्वरूपं तदीयस्थितेर्दार्ढ्यशैथिल्ययोरनुपाते निर्भरं भवति। तस्याधारो लोकानुपालनीयत्वगत-दृढतायाः स्थिरीकरणम्। यथा यथा लोभादयो दुर्भावा वर्धन्ते तथा तथा लोकानां धर्मानुपालने शैथिल्य-मुत्पद्यते। तेन धर्मस्थितिरपि अशक्ता भवति। अयमेव **धर्मस्य ह्रासः**। सृष्टेरादिकाले धर्मस्य स्वरूपं परिपूर्णं भवति। इयं पूर्णतैव धर्मस्य लोकसमुदायस्य च सत्या स्थितिः। अतएवास्य युगपादस्य संज्ञापि **सत्यमिति** कृता। कालान्तरे यदा सत्यनिष्ठं दार्ढ्यं स्खलति शैथिल्यं चायाति तदा जनाः कर्मानुष्ठानमेव धर्मं मत्वा आत्मानं कृतकृत्यं मन्वानाः प्रवर्तन्ते। तदेयं स्थितिः **त्रेता** इत्युच्यते, अग्नित्रयाधारत्वात्।

**'त्रेता' शब्दस्यार्थोऽस्ति-त्रिकम्** अर्थात् त्रयाणां-समष्टेः पूर्णप्राधान्यस्वीकरणम्। त्रिकमिदमग्नित्रयाधारितमस्ति। सत्याद्विचलिताः क्रियाकलापाः ज्ञानस्याभावे प्राणहीना जायन्ते शनैः शनैः विकृताश्च भवन्ति। हस्तापगतान्यपि लक्ष्यन्ते। तदानीमयं संशयो गभीरतरो भवति यत्किं कुर्यात् किं न कुर्याच्चेति। अस्यैव नामास्ति **द्वापरः**। एकं त्यक्त्वापरग्रहणम् अर्थात् ज्ञानं त्यक्त्वा कर्मणो ग्रहणं कर्म त्यक्त्वा ज्ञानग्रहणं वा। एवं साध्यामपि भक्तिं साधनीक्रियेत। भक्तिसाधनत्वे ज्ञानकर्मणोरुभयोः स्खलनं तदानीं केवलं कलनं परिग्रहणमेव भवति लक्ष्यम्। तदेव **कलिः** कलनात् संग्रहणात्। तदानीं भक्तिसाधनस्यापि स्खलनात् अन्ते **'प्रलयः'**। प्रकृष्टो लयः प्रलयः।

सृष्टिः क्रमशः स्वमूलं प्रति स्वीयघटकेष्वेकैकं प्रविशति सर्वमूले ब्रह्मणि लयमाप्नोति। इयमेव प्रलयस्य पूर्णावस्था सृष्टेरवसानम्। एवं सृष्टिः अर्थात् सर्जनं, प्रलयः स्वकारणे विलीनत्वं ब्रह्मणः दैनिकं कर्त्तव्यमस्ति। एतदनुसारं सृष्टिप्रलययोः कालावधिः ८६४००००००० सावनवर्षात्मको विद्यते।

### कल्पमानम्

कल्पः द्वयोर्भागयोर्विभक्तोऽस्ति-अहश्च रात्रिश्च। यथा सावन-अहोरात्रस्य भागेषु प्रत्येकं त्रिंशद्घ-टिकात्मको भवति तथैव कल्पान्तर्गतेषु भागेषु युगानां सहस्राणि सम्भवन्ति। एवं चेत् कल्पस्य कालावधिः ४३२००००००० वर्षात्मको भवति।

कल्पस्याहर्भागे ब्रह्मा सृष्टिं सृजति। यदा १७०६४० वर्षेषु सृष्टिरचनायाः कार्यं पूर्णं भवति तदा ब्रह्मा अस्याः सृष्टेः संचालनाय स्वोद्भावितान् मानसान् शरीरजान् च पुत्रान् निर्दिशति। सः चेतनप्रजासृष्टेरुत्तरोत्तरं जन्म-व्यवस्थायां दक्षं प्रजापतिं इतरव्यवस्थासु मनुं प्रजापतिं च

नियोजयति। इयं व्यवस्था कल्पस्याहर्भागे एव विधेया भवति, अतएव दिवसाधिकारित्वान्मनुप्रजापतिः सम्बद्धं (मनुः प्रजापतिसम्बद्धं) दिवसकालं चतुर्दशधा विभज्य व्यवतिष्ठति। अस्मादेव च कारणा**च्चतुर्दश मनवो** भवन्ति।

**एकस्य मनोः कालावधिः युगानामेक-सप्ततिर्भवति**। अस्मिन् ३०६७२०००० सावनवर्षाणि भवन्ति। अयं **प्राजापत्ययुग** इत्युच्यते। मनवः चतुर्दश भवन्ति अतः समेषां मनूनां प्राजापत्यकालावधिः ४२९४०८०००० सावनवर्षात्मको भवति, यः कल्पावधेः २५९२०००० सावनवर्षैर्न्यूनो मन्तव्यः। प्राजापत्यकालावधेरवसाने प्रलयो जायते। प्रलयस्यावधिरपि कल्पार्द्धभाग-कालावधितुल्य एव भवति। आदिमनोर्व्यवस्थायां यः सन्धिकालः सः १७२८००० सावनवर्षात्मको भवति। स च कृतयुगकालावधितुल्य एव। प्राजापत्ययुगे चतुर्दशसन्धिकालाः प्रतिमनुक्रमेणाग्रे सम्भवन्ति। एवं चेत् समग्रसन्धिकालावधिः २५०२०००० सावन-वर्षात्मको ज्ञेयः।

प्राजापत्ययुगः सन्धिकालावधिं समेत्य चतुर्दश मन्वन्तराणि निर्दिशति। प्राजापत्ययुगः ४२९४०८०००० + सन्धिकालः २५९२०००० वर्षाणि च ब्रह्मणः कल्पावधिं पूरयतः।

### सृष्टिविज्ञानविषये विहङ्गमदृष्टिः

सम्प्रति षड् ब्रह्माणः सम्भूताः। **सप्तमः** प्रवर्तमानः। पराशक्तेर्नारायणस्य नाभिकमलादाविर्भूतत्वादयं **पद्मोद्भव** इत्युच्यते। स्वीयाहोरात्रानुसारं तदायुः शतवर्षात्मकम्। ब्रह्मणः पूर्णताकालः **महाप्रलयः**। एवं चेद् ब्रह्मणोऽवधिं पश्यामः-

ब्रह्मणः अहोरात्रम् = ८६४००००००० वर्षात्मकम्

मासः २५९२०००००००० वर्षात्मकः

(द्वादशस्थानानि)

ब्रह्मणोऽब्दः = ३११०४०००००००००

(त्रयोदशस्थानानि)

ब्रह्मण आयुः = ३११०४०००००००००० वर्षात्मकम् (पञ्चदश स्थानानि)

अत्र दर्शितसम्पूर्णगणनाया आधारः ब्रह्मणोऽहोरात्र-मस्ति। ब्रह्मणः '**पर**' इत्यपि नामान्तरम्। अतः परार्धम् आयुषोऽर्धम्, प्रवर्तमानब्रह्मण आयुषोऽर्धभागः व्यतीतोऽस्ति। वर्तमानः कल्पः ब्रह्मणः **एकपंचाशत्तमस्य वर्षस्य प्रथमो** दिवसोऽस्ति। अस्य **श्वेतवाराह** इति संज्ञाऽस्ति। एवं चेद्वयं वर्तमानदिन पर्यन्तं सावनवर्षाणां गणनां सारल्येन विधातुं क्षमाः। अस्माकं पूर्वजैरयं कालगणनामार्गः अस्मभ्यं संकल्पमाध्यमेन प्रदत्तः येनायं सदैवाविस्मरणीयो भवेत्।

**भारतीयविद्यामनीषी,**

**पीठाचार्यः, वेदपुराण-स्मृति-शोधपीठम्,**

**विश्वगुरुदीप-आश्रम-शोधसंस्थानम्, जयपुरम्**

**मो. 9928391268**

# संवत्सरः

❑ डॉ. नाथूलालसुमनः

ब्रह्मणो द्वितीये परार्धे श्वेतवाराहकल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे बार्हस्पत्यमानेन प्रभवादिषष्ट्यब्दानां मध्ये रुद्रविंशतिकायां नलनाम संवत्सरः (2079 तमः विक्रमाब्दः) अप्रेल- मासस्य द्वितीयदिनाङ्कात् प्रवर्तते।

**संवत्सरः**- संवसन्ति ऋतवो यत्र संवत्सरः। सम् + वस निवासे- 'संपूर्वात् चित्' उणादि 3/72 इति सरन्, सस्य तः (शब्दकल्पद्रुमः)। पञ्चविधवत्सराः भवन्ति - **संपरीदानुपूर्वाच्च, तथोदापूर्वका मताः**। अर्थात् संवत्सरः, परिवत्सरः, इदावत्सरः, अनुवत्सरः, उदावत्सरश्च क्रमशः वत्सरभेदाः। प्रायशः वर्षस्य एव अपरपर्यायः भवति संवत्सरः। सः द्वादशमासात्मकः भवति। मुख्यरूपेण पञ्चविधकालमानानि भवन्ति -

1. **सौरमानम्** - सूर्यस्य एकसंक्रान्तितः द्वितीय-संक्रान्तिपर्यन्तं सौरमासः भवति। संक्रान्त्यनुरूपं मासानां मेषादीनि द्वादश नामानि भवन्ति।

2. **चान्द्रमानम्** - शुक्लप्रतिपदातः अमावस्यापर्यन्तं चान्द्रमासः भवति।

3. **सावनमानम्** - त्रिंशदहोरात्रात्मकः सावनमासः भवति।

4. **नाक्षत्रमानम्** - सप्तविंशतिः नक्षत्राणि भवन्ति, अतएव प्रायशः अष्टाविंशत्यहोरात्रात्मकः नाक्षत्रमासः भवति।

5. **बार्हस्पत्यमानम्** - मध्यमगत्या बृहस्पतिः यदा राशिपरिवर्तनं करोति तदा संवत्सरस्य नामपरिवर्तनं भवति।

भारतीयपंचांगपरम्परायां (उत्तरभारते) मासस्य व्यवहारः चान्द्रमानेन, वर्षस्य व्यवहारः सौरमानेन, संवत्सरस्य व्यवहारश्च बार्हस्पत्यमानेन भवति। बार्हस्पत्यमानेन संवत्सरस्य षष्टिः भेदाः - प्रभवविभव-शुक्लादयः भवन्ति। षष्टिवर्षानन्तरम् एतेषां पुनरावृत्तिः भवति। षष्टिसंवत्सराणां विंशतिसंख्यकं समूहत्रयं भवति क्रमशः ब्रह्मविंशतिका (1-20), विष्णुविंशतिका (21-40) रुद्रविंशतिका (41-60) च। क्रमशः ब्रह्मविष्णुरुद्राः एतेषां प्रधानदेवाः भवन्ति।

मानवसभ्यतायाः आरम्भकालतः कालोऽपि चिन्तनस्य अन्यतमविषयः आसीत्। लोकानां स्थितिः काले स्वीकृता अस्ति- 'काले लोकाः प्रतिष्ठिताः' (अथर्ववेदः 19/54/4)। अन्नम्भट्टः कालस्य लक्षणं ददाति- 'अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।' (तर्कसंग्रहः)। पुराणेषु कालस्य वृहच्चिन्तनम् उपलभ्यते। श्रीमद्भागवतमहापुराणे कालस्य सूक्ष्मस्वरूपं स्थूलस्वरूपं च व्यवस्थितरूपेण वैज्ञानिकपद्धत्या चिन्तितमस्ति। भागवतपुराणस्य तृतीयस्कन्धे एकादशाध्याये विदुरमैत्रेयसंवादमाध्यमेन कालगणना सरलतमरूपेण प्रतिपादिता -

कालस्य लघुतमा इकाई = 1 परमाणुः

2 परमाणु = 1 अणुः

3 अणवः = 1 त्रसरेणुः

3 त्रसरेणुः = 1 त्रुटिः

100 त्रुटयः = 1 वैधः

3 वैधाः = 1 लवः

3 लवाः = 1 निमेषः

3 निमेषाः = 1 क्षणः

5 क्षणाः = 1 काष्ठा

15 काष्ठाः = 1 लघु

15 लघूनि = 1 नाडिका

2 नाडिके = 1 मुहूर्तः (48 मिनिट)

30 मुहूर्ताः = 1 अहोरात्रम्

15 अहोरात्राणि = 1 पक्षः (शुक्लः/कृष्णः)

2 पक्षौ = 1 मासः

2 मासौ = 1 ऋतुः

3 ऋतवः = 1 अयनम् (दक्षिणम्/उत्तरम्)

2 अयने = 1 वर्षम् (360 अहोरात्राणि)

1 वर्षम् = 1 संवत्सरः (360 अहोरात्राणि)

432000 मानववर्षाणि = 1 कलियुगम् (1 चरणं)

864000 मानववर्षाणि = 1 द्वापरयुगम् (2 चरणे)

1296000 मानववर्षाणि = 1 त्रेतायुगम् (3 चरणानि)

1728000 मानववर्षाणि = 1 सत्ययुगम् (4 चरणानि)

**4320000 मानववर्षाणि = 1 चतुर्युगी** (12000 दिव्यवर्षाणि)

**1000 चतुर्युग्यः = 1 कल्पः** (ब्रह्मणो दिनम्)

**2 कल्पौ = ब्रह्मण अहोरात्रम्**

कल्पः ब्रह्मणो दिनम् अर्थात् सृष्टिकालः, तावती एव निशा अर्थात् प्रलयकालः। कल्पे-कल्पे ब्रह्मा लोकान् सृजति निमीलति च। अतएव सृष्टिकालः पृथिव्याः आयुः, यथा उपरि दर्शितं तथैव एकस्मिन् कल्पे 4320000 × 1000 अर्थात् 432 कोटि मानववर्षाणि भवन्ति। द्वौ कल्पौ ब्रह्मणोऽहोरात्रम्, तादृशानाम् 360 अहोरात्राणां ब्रह्मणः वर्षम्, तादृशानि 100 वर्षाणि ब्रह्मणः परमायुः भवति। ब्रह्मणः आयुः परार्द्धद्वये विभक्तमस्ति – प्रथमपरार्द्धः द्वितीयपरार्द्धश्च। एकब्रह्मणः आयुसमाप्त्यनन्तरं द्वितीयब्रह्मणः कालः प्रारभ्यते। एवं सृष्टिक्रमः प्रलयक्रमश्च निरन्तरं प्रचलतः यतो हि कालः नित्य अतएव अनादिरनन्तश्च भवति।

कल्पे अर्थात् ब्रह्मणः एकस्मिन् दिने चतुर्दश मनवः भवन्ति। एकस्य मनोः कालः **मन्वन्तरम्** इति कथ्यते। एकं मन्वन्तरं सन्धिकालसहितं 71 चतुर्युगीपर्यन्तं चलति। सन्धिकालस्य परिमाणः सत्ययुगपरिमाणसमानः (1728000 मानववर्षाणि) भवति। एकस्मिन् कल्पे चतुर्दश मन्वन्तराणि पञ्चदश सन्धिकालाश्च भवन्ति। एवं (14 × 71) 994 चतुर्युग्यः + 6 चतुर्युग्यः (15 सत्ययुगपरिमितः सन्धिकालः) = 1000 चतुर्युग्यः कल्पस्य परिमाणः।

वर्तमानब्रह्मणः आयुषः प्रथमपरार्धः समाप्तः अर्थात् **50 वर्षाणि अतीतानि**। द्वितीयपरार्धस्य प्रथमवर्षम् अर्थात् 51 तमं वर्षं प्रचलति, तस्यापि प्रथमं दिनम् (कल्पः) आरब्धम्। अस्य कल्पस्य नाम अस्ति **श्वेतवाराहकल्पः**। अस्मिन् कल्पे भगवता विष्णुना वराह (सूकर) रूपं धृत्वा पृथिवी उद्धृता। प्रथमपरार्धस्य

प्रथमकल्पे वर्तमानब्रह्मणः उत्पत्तिरभवत्, अतएव तस्य नाम आसीत् **ब्राह्मकल्पः**। प्रथमपरार्धस्य एव अन्तिमे कल्पे भगवतः नाभिसरोवरात् सर्वलोकमयं पद्मं प्रकटितम्, अतएव तस्य नाम आसीत् **पाद्म**कल्पः।

वर्तमानब्रह्मणः आयुषः 51 तमे वर्षे अस्मिन् प्रथमे दिवसे अर्थात् श्वेतवाराहकल्पे चतुर्दशमन्वन्तरेषु षड् मन्वन्तराणि सन्धिकालसहितानि अतीतानि। अधुना **सप्तमं** मन्वन्तरं **वैवस्वतमन्वन्तरं** प्रचलति, तस्यापि 71 चतुर्युगीषु 27 चतुर्युग्यः परिसमाप्ताः, 28 तमी चतुर्युगी चलति, तस्यापि सत्ययुगं, त्रेतायुगं, द्वापरयुगं च अतीतानि, अधुना कलियुगं प्रचलति, तस्यापि 5123 वर्षाणि अतीतानि। अस्मिन् वर्षे चैत्रशुक्लाप्रतिपदातः 5124 तमं वर्षं प्रचलति (विक्रमसंवत् 2079)। एवं प्रकारेण वर्तमानसृष्टिप्रक्रियायाः आरम्भकालतः 6 मन्वन्तराणि (सन्धिकालसहितानि) + 27 चतुर्युग्यः + 1 सत्ययुगं + 1 त्रेतायुगं + 1 द्वापरयुगं + 5123 कलियुगवर्षाणि अतीतानि। एतद् एव पृथिव्याः वर्तमानायुः अस्ति। एषः कालः प्रायशः 197 कोटिमानववर्षाणां कालः भवति। पृथिव्याः आयुषः एषा पौराणिकी गणना वैज्ञानिकगणनातुल्या एव अस्ति। कालगणनायाः एष क्रमः संकल्पमन्त्रे अपि उच्चार्यते, तद्यथा - 'ॐ अस्य श्रीविष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीये परार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे (अमुक) संवत्सरे (अमुक) मासे (अमुक) पक्षे (अमुक) वासरे .......इत्यादि'। विदुर- मैत्रेयसंवादमाध्यमेन एव महर्षिः **वेदव्यासः** एतदपि प्रकटीकरोति यत् ब्रह्मणः परार्धद्वयस्य कालः श्रीहरेः **एकनिमेषकालः** भवति-

**कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते।**
**अव्याकृतस्यानन्तस्य अनादेर्जगदात्मनः।।'**

भा. 3/11/37

**खगोलीयाधारः -**

वैदिक-ऋषीणां मते वर्तमानसृष्टिः पञ्चमण्डलक्रमा वर्तते। यथा- चन्द्रमण्डलम्, पृथिवीमण्डलम्, सूर्यमण्डलम्, परमेष्ठीमण्डलम्, स्वायंभुवमण्डलम् च।

1. **चन्द्रमण्डलम्** - चन्द्रद्वारा पृथिव्याः परिक्रमा मण्डलम्- 1 चान्द्रमासः (प्रायशः 28 दिनानि)।

2. **पृथिवीमण्डलम्** - पृथिवीद्वारा सूर्यस्य परिक्रमा मण्डलम् - 1 वर्षम् (प्रायशः 365.25 दिनानि)

3. **सूर्यमण्डलम्** - सूर्यद्वारा (सौरमण्डलसहितं) आकाशगंगायाः केन्द्रस्य (परमेष्ठिनः) परिक्रमामण्डलम् - 1 मन्वन्तरम्।

4. **परमेष्ठीमण्डलम्** - आकाशगंगाद्वारा (समस्तसौरमण्डलसहितम्) उपरितनकेन्द्रस्य (**स्वयंभुवः**) परिक्रमामण्डलम् - 1 कल्पः।

(स्रोत 'भारत में विज्ञान की उज्ज्वल परम्परा' लेखक- श्री सुरेश सोनी)

एवं प्रकारेण भारतीयैः ऋषिमुनिभिः स्वतपोबलेन अन्तर्दृष्ट्या च कालगणनायाः यत् स्वरूपं प्रकटीकृतं तत्स्वरूपं खगोलीयघटनाक्रमेषु आधारितमस्ति न तु कपोलकल्पितम्।

**- उपाध्यक्षः, भारतीयसंस्कृतप्रचारसंस्थानस्य**

# नववर्षमभिलक्ष्य किञ्चित्

❑ डॉ. गीता शुक्ला

**वर्षे नवेऽस्मिन् नवजातहर्षाः**
**भवन्ति पूजाः कुलदेवतायाः।**
**नवा नवीना च विचारमाला**
**समर्चनं गौरिगणेशपूजा।।**

\- आचार्यरमेशचन्द्रशर्मा

भारतीयपरम्परायां नववर्षस्यारम्भः विक्रम-संवत्सरस्य प्रथमे दिने भवति। नूतनं वर्षं नवीनं वर्षं वा नववर्षम्। नववर्षस्यारम्भः जनाः प्रायः जनवरीमासस्य प्रथमदिनाङ्कतः स्वीकुर्वन्ति, किन्तु भारतीयानां नववर्षं तु चैत्रमासस्य शुक्लपक्षस्य प्रतिपदातिथितः आरभ्यते। भारतवर्षे अतिप्राचीनकालात् प्रचलितायाः कालगणनायाः आरम्भोऽपि वर्षप्रतिपदातिथितः एव भवति। एतदेव **विक्रमसंवत्** इति उच्यते यतो हि विक्रमादित्यः संवत्सरस्य प्रवर्तनञ्चकार। चैत्रशुक्ल प्रतिपदातः एव युधिष्ठिरसंवत् शालिवाहनसंवत् तथा शकसंवदादिनववर्षाणाम् आरम्भो भवति।

पौराणिकमतानुसारेण चैत्रमासस्य प्रथमे सूर्योदये जगत्पित्रा ब्रह्मणा सृष्टिरियं सृष्टा। शुक्लपक्षस्य अनेनैव दिवसेन विक्रमसंवत्सरस्य प्रारम्भो भवति।

**चैत्रे मासे जगद् ब्रह्मा ससर्ज प्रथमेऽहनि।**
**शुक्लपक्षे समग्रे तु सदा सूर्योदये सति। ब्रह्मपुराणे**

विक्रसंवत्सरस्यारम्भः ईसातः सप्तपञ्चाशत्वर्षाणि पूर्वं विक्रमादित्येन विहितस्य **शकानां** पराजयस्योपलक्ष्येऽभवत्। मासेऽस्मिन् ऋतुराजवसन्तस्य प्रभावो सर्वत्र प्रस्फुटति। सम्पूर्णमपि वातावरणं नूतनतामवाप्नोति। भारतवर्षस्य विभिन्नेषु क्षेत्रेषु वहव उत्सवाः आयोज्यन्ते अस्मिन् मासे।

भारतीमासपत्रिकायाः पूर्वसम्पादकस्य प्यारेमोहन-शर्मामहाभागस्य मासावतरणरूपे प्रस्तुतः श्लोकः उल्लेखनीयोऽत्र -

**चैत्रे चेतसि भ्राजते भगवतो वासन्तिकं दर्शनम्**
**नानापुष्पचयैः शुभैर्विरचिता माला गले दृश्यते।**
**वस्त्राणि बहुरङ्गितानि बहुलां शोभां लभन्ते पराम्**
**चैत्रे चित्रविचित्रपुष्पनिचयैः राराजते काश्यपी।।**

विक्रमसंवत्सरस्य चैत्रमासस्य च महत्त्वं विविधकारणैः वर्तते, यथा -

- सम्राट्विक्रमादित्येनास्मिन्नेव दिवसे शकान् विजित्य स्वसाम्राज्यं स्थापितम्।
- शालिवाहनसंवत्सरस्य प्रारम्भोऽपि अस्मिन्नेव दिवसे अभवत्।
- युगाब्दस्य प्रारम्भोऽपि अस्मिन्नेव दिवसे जातः।
- आर्यसमाजस्य स्थापना अस्मिन्नेव दिवसे जाता।
- सिक्खपरम्परायाः द्वितीयगुरोः अङ्गदेवस्य जन्मदिवसोऽपि चैत्रशुक्लप्रतिपदातिथौ भवति स्म।
- हेडगेवारमहोदयानां जन्म अस्मिन्नेव दिवसे समभवत्।

अन्यान्यपि कारणानि सन्ति एतस्य महत्त्व-प्रतिपादकानि। तथा रामायणकाले **श्रीरामचन्द्रस्य** राज्याभिषेकः महाभारतकाले धर्मराज-**युधिष्ठिरस्य** राज्याभिषेकश्च।

अतएव अस्माभिः अस्माकं मान्यतानुसारेण नववर्षोत्सवः चैत्रशुक्लप्रतिपदातिथौ एव समायोजनीयः।

अन्ते च-समेषां जनानां कृते नूतनसंवत्सरः 2079 शुभो भूयात् इति कामये।

उक्तञ्च -

**जनाश्च सर्वे सुखिनो भवन्तु क्षेत्रेऽथ देशे धनधान्ययुक्ते।**
**देशस्य रक्षा नवद्वारपालैः सदा भवेदेव सुचारूरूपम्।।**

-आचार्यरमेशचन्द्रशर्मा

**एसोसिएट प्रोफेसर, संस्कृतविभागाध्यक्षः, भगवानदीन आर्यकन्या स्नात्कोत्तरमहाविद्यालयः, लखीमपुर खीरी (उ.प्र.)**

# कारुण्यप्रकर्षः[१]

❑ अनुवादक :- डॉ. सत्यव्रत वर्मा
राष्ट्रपतिसम्मानितः

बलौचसैनिकाः सैन्यवाहने कुक्कुटा इव भृता आसन्। तेषां सम्भारजातम् अस्त्रवाहिन्या प्रातरेव प्रहितम्। सर्वे सैनिका भुशुण्डी अधारयन्। दारुणकालानुरोधात् सर्वा भुशुण्ड्यः सदा संगीनैः संवलिता अभूवन्।

अस्य बलौचसैन्यदलस्याग्रणी रमजानखान इति नामधेयो जमादारपदभागासीत्, यं सर्वे 'मौलवी जी' इति न्यगदन्। देशविभक्तेरूर्ध्वं ते अमृतसरप्रदेशान् मौहम्मदीयान् पाकिस्तानं प्रापयन्। दग्धमस्जिदानां पुरतस्ते वाहनं विरमय्य सम्भूय तारस्वरेणाक्रन्दन्। इदानीं तेषामभीष्टोऽर्थोऽपवर्गम् अभजत। कोऽपि मौहम्मदीय-स्तत्र नासीद् यो मौलविना पाकिस्तानस्य स्वर्गसंकाशां धरां न प्रेषितः। यश्च पितृभुवं हातुं नैहत (=नाभ्यलषत्) मौलवी तं यवनसाम्राज्यमहिम्नो वर्णनेन तथा व्यामोहयद् यथा स निर्बन्धमुज्झित्वाऽचिरेण ततः प्रस्थातुं सन्नद्धोऽभूत्।

अद्य यदा ते ततो वाहनेन प्रस्थातुकामा आसन् मौलवी स्वगतं व्यचिन्तयद् यत् सर्वेषां प्रभुरेक एवास्ति। अमृतसरवर्तिनो हरिमन्दिरस्याधरेष्टिका तु यवनभिक्षुणैव निहिता। मौलवी दूरादेव गुरुद्वारस्य स्वर्णकलशान् वीक्ष्य शिरसा प्राणमत्।

वाहनं ततः प्रतस्थे मौलवी च शीतवातलहरीस्पर्शान् निद्रालुरजनि। निमीलितयोर्नयनयोः संहारस्य बीभत्सानि दृश्यानि पुरतो नर्तितुं प्रक्रान्तानि (=आरब्धानि)। कथं मुस्लिमा हिन्दून् सिक्खान् च खण्डशोऽकृन्तन्, कथं हिन्दवः सिक्खाश्च कणशो वैरं निरयातयन् (=अशोधयन्)। केचिदाहुर्यवनाः कदनमारभन्त, केचिद् अब्रुवन् हिन्दवस्तदकार्षुः।

मौलवी एवंजातीयेषु विचारेषु मग्न आस यद् राजाध्वनो भीतिकरश्चीत्कार उत्थितस्तमनु च वाहने सैनिकानां हासरवोऽश्रूयत। अनुयुक्ते (=पृष्टे) ऽवगतं यद् वाहनं यदा वायुशकलेन यान्तं सिक्खयुवकमुपेतं वाहनस्थ एकः सैनिकः संगीनप्रहारैस्तस्य कन्धरां जर्जरामकार्षीत्, स च भेकवद् उत्प्लुत्य प्रणालिकायाम् अपतत्। एतद् (चेतोहरं) दृश्यं विलोक्यैव सैनिका हर्षाध्माता अजायन्त। अनया हत्यायुक्त्या जमादारमहाशयोऽपि हास्यं नियन्तुं न प्राभवत्। सोऽचिन्तयद् दिष्ट्या रुच्यविधिना सिक्खभ्रुवः कालोदरं गमितः।

वाहने हासः कलयैव विरत आस यद् राजमार्गात् पुनः भीषणश्चीत्कारः कर्णगोचरोऽभूत्। चीत्कारोऽयं कस्याश्चिद् योषित आसीत्। वाहनेऽट्टहासक्षण्डतरोऽजायत। सम्प्रति दुग्धं विक्रीय ग्रामं प्रत्यावर्तमाना गोपी वाहनगुप्तानां शूराणां शरव्यतामगात्। निशितं संगीनाश्रि-गोप्याः कबर्या समघट्टत, निकृत्तः केशगुच्छश्च तेन सार्धं ट्रकं प्राप्तः। गोप्याः दुग्धभाजनमेकतोऽपोपतत्, सा च पुञ्जीभूताऽपरतः प्रासरत्। बलौचवीरास्तदा तं केशगुच्छं चुम्बितुं प्रवृत्ताः। यदा तेषां केशगता भावा अपवर्गं जग्मुर् जमादारप्रवीरस्तं गुच्छं पुष्पवद् डायर्यां निदधौ। तेन चिन्तितं स्याद् विधर्मिणां (काफिराणां) देशस्येदम् अभिज्ञानं मयि चिरं स्थास्यतीति।

प्राभातिकः शीतो वातोऽवात्। अमृतसरनगराद् बहिःस्थितेन राजमार्गेण विरला एव संचरमाणा अदृश्यन्त। सैनिकाः पाकिस्तानस्य गौरवम् उद्गातुं प्रारभन्त। पाकिस्तानं दीप्यमानं नक्षत्रमस्ति। तज्जगति न्यायस्य प्रतिकृतिर् निराश्रितानां चाश्रयो भविता। न तत्र कश्चित् परपीडकः स्थास्यति, न च पीडितः।

राजपथे भूय एका योषा दृष्टिपथमिता। साकृत्यैव सिक्खधर्मानुगा प्रतीयते स्म। चालको मन्दं मन्दं वाहनं तां

१. मूल-लेखकः **करतारसिंह दुग्गलः**। मूलाभिधा-**इंसानियत**।

निकषाऽनयत्। ट्रके सव्येतरभागे आसीनः सैनिकः कुन्तसमेन संगीनेन तामुदप्लावयत्। सा पुष्टावयवा धर्मानुरागिणी राजमार्गे सरवं न्यपतत् हृदिस्पृक् चीत्कारश्चोदस्थात्। वाहनमट्टहासैर् गुंजितं द्रुतं च ततः पलायितम्। सा मन्दभाग्याऽधोमुखी न्यपतत् सैनिकाश्च पादाग्राभ्यामुत्थाय तां व्यथमानां विलोक्य हर्षनिर्भरा अजायन्त। तामुद्दिश्य च वार्ताः प्रावर्तयन्। कश्चिदाह सा गुरुद्वारादायाति स्म, कश्चिदभाणीत् सा गुरुद्वारं याति स्म। कश्चिच्चाब्रवीत् सा पथ्याभ्यवहारेण भ्रिष्टाऽवयवाऽजनि। जमादारश्च निर्णेतुं न प्राभवत् शत्रुदेशे प्राणहानिमभिलक्ष्य किं लिखेत् ? एका योषित्, योषा तद्गर्भगतश्च शिशुर्वा।

मीलमितोऽध्वाऽतिक्रान्तः। ते राजमार्गप्रान्ते मूत्रविसर्जनं कुर्वाणमेकं प्रवयसं (=वृद्धं) व्यलोकयन्। ट्रकं परिष्कृतं राजपथं परिहाय रजोभरितं मार्गं प्रापद्यत। जमादारं दक्षिणेन स्थितः सैनिको वृद्धस्य पृष्ठे संगीनं प्रावेशयत्। स कन्दुकवत् लुठन् गर्ते पतितः। तदा चीत्कारः, वाहने चाट्टहासः। वाहनं पुनर्वेगेन धावितुं प्राक्रामत।

रमजानखानो व्यचिन्तयत् – सुदिवसोऽद्य। बहवो विधर्मिणो यमसदनं प्रापिताः। स विवरणपुस्तिकाम् अपावृत्य वृत्तमद्यतनमकरोत्।

यथा यथा ते नगराद् दूरेऽपायान् तथा तथा तेषां प्राणसंशयोऽपि क्षैण्यमयात्। सैनिकानामुत्साहः प्रकर्षमारोहत् नवखेलायां च तेऽमन्दमानन्दमविन्दन्।

ट्रकमिदानीं वातरंहसोत्पतदिव प्रत्यभात्। पुरस्तात् सीम्नि पाकिस्तानध्वज आलोकेऽपतत्। सैनिका ध्वजं संदृश्योत्साहेन निभृताः। ते 'पाकिस्तानममरं भूयादिति (पाकिस्तान जिन्दाबाद) भूयोभूय उद्घोषमकार्षुस् ततश्च कश्चिद् गानं गातुं प्रवृत्ताः। ध्वजो नूनं दृश्यते स्म परं सीमा मीलत्रयं दूरमवर्तत।

किंचिदग्रे गत्वा सैनिकाः पञ्चाशत्पदान्तरेण गच्छतस्त्रीन् सिक्खान् अवालोकयन्। तेषां द्वौ राजमार्गं दक्षिणेन आस्ताम्, एकश्च वामेन। चालकं समया स्थिताः सैनिकाश्चक्षुःसंकेतैर्दुरभिसन्धिं प्राकल्पयन्। यदा च सकलं चित्रं पूर्तिमगात् ते सर्वेऽस्मयन्त। चालकः पुनः ट्रकं मृन्मयं मार्गं प्रापयत्। क्षणेन सैको युवा सिक्खः संगीनशिखयाऽविध्यत। यूनश्चीत्कारं निशम्यैका योषा सम्भ्रमेण विस्मयेन च परावृत्याद्राक्षीत्। वाहनं तामन्तिकं प्राप्तं, संगीनं च तस्या वक्षसि निखातमभूत्। इदानीं वृद्धस्य पर्याय आगतः। स श्रवणमान्द्याद् वेगादुपागतस्यापि ट्रकस्य संरावं नाश्रौषीत्। वृद्धः क्षुत्पिपासार्तः शरणार्थी प्रतीयते स्म। संगीनाग्रतुन्नः स सहसोदप्लवत वाहनचक्रस्य पुरतश्चापतत्। तस्य कपालं खण्डितं चूर्णितं चाभूत्। चालकस्तीव्रगत्या वाहनं प्रैरिरत्।

पाकिस्तानध्वजः पुरस्ताददृश्यत। सैनिका अनारतं जयघोषमकुर्वन्। चालकश्चोत्तरोत्तरं वाहनगतिमवर्धत। तदैव सोऽपश्यद् यदेका वन्या मार्जारी उत्प्लुत्य ट्रकस्य पुरतः प्राप्ता। मार्जारीं रक्षितुं चालकः सहसा ट्रकं दिगन्तरे परावर्तयत् तच्चानियन्त्रितं भूत्वा विशालवृक्षेण समघट्टत क्षणेन चाधरोत्तरमजायत। पंचविंशतिः सम्भिन्नाश्चीत्कारा उद्गताः। अकालहीनं च तत्र नीरवत्वं प्रसृतम्। प्राणरक्षणरताः परोपकारिणः क्षणेन प्राणैर्व्यमुच्यन्त। इंजनाख्यस्य यन्त्रस्य पैट्रोलेन ट्रके हुतभुक् (=वह्निः) प्रावर्तत। राजमार्गे कोऽपि हिन्दुस्तानीयो विधर्मी-काफिरो-नासीद् यो बलीचवीराणां साहाय्यमाचरेत्।

दूराद् दृश्यमानः पाकिस्तानध्वजस्तथैव गगनेऽनृत्यत्। मार्जारी सम्भ्रमात् करीरवृक्षम् आरोहत्। ततश्चाक्षिणी विस्फार्य कण्टकावलीमध्याद् वह्निज्वाला परीतं ट्रकं व्यलोकयद् व्यस्मयत च।

**पूर्व प्राचार्य, मानद प्रोफेसर,**
**7/34, पुरानी आबादी, नामदेव फ्लोर मिल**
**के पास, श्रीगंगानगर-335001**

# श्रीदुर्गाष्टकम्

## [ सर्वसिद्धिप्रदं स्तोत्रम् ]

❑ आचार्यः पं. नथमलशास्त्री दाधीचः

लक्ष्मीदयाशक्तिमतिस्वरूपा समस्तभूतेषु च मातृरूपा।
विश्वात्मिका विश्वविमोहिनी च तां विष्णुमायां मनसा स्मरामि।।१।।

ब्रह्माविष्णुशिवेन्द्रदेववदनात्तेजो महन्निर्गतमेकस्थं तदभूच्च नीलवदनं नारी-स्वरूपं परम्।
शस्त्रास्त्राम्बरभूषणैः सुरगणैः सम्मानितां संस्तुतां, देवीं सैरिभमर्दिनीं भगवतीं सिंहाधिरूढां भजे।।२।।

या ज्ञानविज्ञानविवेकबुद्धिसिद्धिसमृद्धिविजयप्रदात्री।
साऽनन्तवीर्या भवमुक्तिहेतुर्दुर्गा प्रसन्ना वरदा ममास्तु।।३।।

ऐं वाणी निगमार्थभावभरिता वाग्वादिनी भारती ह्रीं माया भुवि भोग-योगविभवा सौभाग्यलक्ष्मीः शुभा।
क्लीं काली करुणार्णवा शरणदा क्लेशापहा कामदा मां पायात्त्रिगुणात्मिका भगवती दुर्गा दयार्द्रा सदा।।४।।

शाकम्भरीं शाकफलान्नदात्रीं दैत्यार्दिनीं भक्तभयार्तिहन्त्रीम्।
कात्यायनीं कामदुघां त्रिनेत्रां दुर्गां पराम्बां हृदि भावयामि।।५।।

चामुण्डां रणविक्रमां मधुमतीं माहेश्वरीं माधवीं शूलं चक्रगदासिचापपरिघान् दिव्यायुधान् बिभ्रतीम्।
देवीं दानवरक्तबीजहननीं कालीं कलामालिनीं शक्तिं शुम्भनिशुम्भदैत्यदलनीं तां भद्रकालीं भजे।।६।।

श्रीविद्यां सुखदां सदाशिवमयीं मायां जगन्मोहिनीं, ब्रह्माणीं सुरवन्दितामभयदां नारायणीं वैष्णवीम्।
कल्याणीं त्रिपुरां परापरमयीं त्रैयम्बकां शाम्भवीं वन्देऽहं शशिशेखरां भगवतीं तेजोमयीमम्बिकाम्।।७।।

सुरनरमुनिपूज्यां चण्डिकां योगमायामसुरदलनिहन्त्रीं कालिकां खड्गहस्ताम्।
स्तवनहवनतुष्टां तेजसा भासमानां, भज भज नवदुर्गां श्रीपदां सिद्धिदात्रीम्।।८।।

महाकालीं महालक्ष्मीं महाविद्यां सरस्वतीम्।
भजेऽहं भावितो भक्त्या भवानीं भुवनेश्वरीम्।।९।।

तुष्टिं पुष्टिं श्रियं वृत्तिं सुयशः सुखसम्पदाम्।
अष्टादशभुजा दुर्गा स्तुता प्रीता प्रयच्छति।।१०।।

दुर्गाष्टकं पठेन्नित्यं ध्यात्वा देवीं महेश्वरीम्।।
तस्य सर्वार्थसिद्धिः स्यान्महामायाप्रसादतः।।११।।

।। श्रीदुर्गार्पणमस्तु ।।

पूर्वप्राध्यापकः
छापर ( चूरू )
मो. 9351226660

# जयति जगति देवी सच्चियायाम्बिकेशी

❑ डॉ. हरिसिंहराजपुरोहितः 'राजहरि'

नभसि ननु दधाना वैजयन्तीं नतांगी
उदयदरुणवस्त्रा खड्गिनी कोमलांगी।
मृगपतिमधिरूढा शूलिनी चारुभंगी
जयति जगति देवी सच्चियायाम्बिकेशी।।1।।

त्वमसि भुवि शरण्या गाढकारुण्यसिन्धु-
श्चिरपतितजनानां हेतुहीनस्स्वबन्धुः।
निरवधितपितानां शीतले! शीतलेन्दुर्-
जयसि जगदजेये! सच्चियावेशि! मातः!।।2।।

जनिमरणभवाब्धेस्तारिणी नौरनन्या
जगदविरतपीडाहारिणी भद्रकाली।
परिजनशुभसौख्यदायिनी शक्तिरूपा
जयति जगति देवी सच्चियायाम्बिकेशी।।3।।

दनुजदमनदक्षा दीप्तवैश्वानराक्षी
विमलसलिलशुभ्रा कामदा नीरजाक्षी।
कलितललितदेहा शुम्भहन्त्री मृगाक्षी
जयति जगति देवी सच्चियायाम्बिकेशी।।4।।

निरुपमबलवीर्या चण्डिका चण्डमुण्डा
हतकहननचण्डा दुर्गमा दुर्गभामा।
महिषमसुरमेका हन्तुमात्तत्रिशूला
जयति जगति देवी सच्चियायाम्बिकेशी।।5।।

जडमतिमतितुष्टा वाक्पतिं साधयन्ती
वचनवियुतमीशा वाग्मिनं कर्तुमीशा।
कविमकविकमपूर्वं कालिदासं भवानी
जयति जगति देवी सच्चियायाम्बिकेशी।।6।।

सततमचिरमेषा राधिता कल्पवल्लीर्
धनिनमधनिनं वा वाञ्छितं पूरयन्ती।
विविधविभवमुग्धान् मोहिनी मोकुकामा
जयति जगति देवी सच्चियायाम्बिकेशी।।7।।

अतुलितगुणशीला दृष्टसौन्दर्यलीला
त्रिशिखशिखनिभाभा भाद्रमासाम्बुदाभा।
हरिहरबलसिद्धा सिद्धिदा सर्वसिद्धा
जयति जगति देवी सच्चियायाम्बिकेशी।।8।।

भुवनमखिलमादौ स्वेच्छयोत्पादयन्ती
जनमविकलमाद्या प्राकृतं पालयन्ती।
भवपरिभवखिन्नं क्रोडमावेशयन्ती
जयति जगति देवी सच्चियायाम्बिकेशी।।9।।

**संस्कृत-व्याख्याता,**
**184, रूपनगरं प्रथमं, पालमार्गः, जोधपुरम्**

# श्रीराघवेन्द्रकविरचितराधामाधवनाटकम्

❑ डॉ. सुरेन्द्रकुमारशर्मा

श्रीराघवेन्द्रकविना विरचितं "राधामाधवनाटकं पाण्डुलिपिरूपेण राजस्थान- प्राच्यविद्याप्रतिष्ठानस्य शाखाकार्यालये अलवरे उपलब्धम्। सूचीपत्रे इदं नाटकं 2253 क्रमांके निर्दिष्टम् अस्ति। श्रीधरभास्करवर्णेकर-महोदयेन रचितस्य संस्कृतवाङ्मयकोषस्य प्रथमखण्डे 423 तमे पृष्ठे अपि अस्य नाटकस्य उल्लेखः वर्तते। अस्य नाटकस्य एका एव प्रति अलवरे उपलभ्यते। राधामाधवनाम्ना यद्यपि अन्यानि नाटकानि अपि यत्र-तत्र उपलभ्यन्ते किन्तु तेषां रचयिता राघवेन्द्रकविः नास्ति, अन्ये कवयः तेषां रचयितारः सन्ति। अस्मिन् नाटके कविना स्वपरिचयः न प्रदत्तः। केवलम् अस्य समाप्तौ नाटकस्य नाम एव लिखितम् अस्ति। राघवेन्द्रकवेः परिचयस्तु श्रीधरभास्करवर्णेकरमहोदयेन स्वकीये **संस्कृतवाङ्मयकोशे** एव प्रदत्तः - "राघवेन्द्रकविः ई. 18 शदी पूर्वार्द्धम्। 'राधामाधव' नाम सप्तांकनाटकस्य प्रणेता। प्रथम अभिनय रासोल्लासमहोत्सवस्य अवसरे। राधाकृष्णस्य विलासस्य कथानकं निबद्धम् अस्ति। प्रधानरसः श्रृंगारः। "राघवेन्द्रकविः राधावल्लभ-सम्प्रदायस्य अनुयायी आसीत्। अस्य एका एव रचना राधामाधवनाटकमेव उपलभ्यते। अस्मिन् नाटके वृन्दावनशब्दस्य बहुधा प्रयोगेण कवेः जन्मस्थानं ब्रजप्रदेशः अथवा वृन्दावनमेव प्रतीयते। नाटकस्य प्रारम्भे नान्द्याः पद्यद्वयम् उपलभ्यते।

प्रथमपद्ये आशीर्वादात्मकनान्दी अस्ति -

**राकाकैरवबंधुबंधुरमुखो, बन्धूकवर्णाधरः,**
**खेलत्खञ्जनकंजमञ्जुनधनः, सन्वीतपीतांवरः।**
**चञ्चच्चन्द्रकवृन्दचारुचिकुरः, सान्द्राम्बुदाडंबरो,**
**मंदस्मेरमनोहरो हरतु वः, संसारभारं हरिः ।।1-1।।**

नाटकस्य प्रस्तावनायाम् अभिज्ञानशाकुन्तलस्य प्रभावः दृश्यते। इदं नाटकं सप्तसु अंकेषु विभक्तमस्ति। प्रत्येकस्य अंकस्य अन्ते कविना अंकस्य नाम लिखितम् अस्ति। प्रथमाङ्कस्य नाम मुग्धमाधवम्" द्वितीयाङ्कस्य नाम "विदग्धमाधवम्" एवमेव क्रमशः "समुत्कण्ठविकुण्ठः" "व्याकुलगोकुलनाथः" "कन्दर्पदर्प रसालगोपालः" "रासोल्लासजगन्निवासः" "सानन्दगोविन्दः" अङ्कानां नामानि कथानकानुरूपं लिखितानि सन्ति। नाटकस्य अन्ते भरतवाक्यमपि उपलभ्यते-

**समुन्मीलन्नीलाम्बुदसमुदयश्यामलतनु-**
**र्निमीलन्नीलेन्दीवरवदनवंशीनवरवः।**
**निशिञ्जन्मंजीरस्मरसमरलीलापरिभवः,**
**सतृष्णः श्रीकृष्णो विषयमृगतृष्णां हरतु वः।।7.19।।**

राधामाधवनाटकस्य कथायाः मूलाधारः राधाकृष्णयोः कथा अस्ति। एषा कथा भागवतादिषु वैष्णवपुराणेषु विस्तरेण उपलभ्यते। अतएव नाटकस्य कथानकं प्रख्यातम् अस्ति। कविना स्वसाम्प्रदायिक-मतानां पुष्ट्यर्थं कथानके परिवर्तनं परिवर्धनमपि कृतम्।

**प्रथमाङ्के** सगुणभक्तेः महत्त्वं प्रतिपादितम्। **द्वितीयाङ्के** श्रीकृष्णस्य सौन्दर्यवर्णनं कृतम्। **तृतीयाङ्के** राधाकृष्णयोः निकुञ्जविहारस्य राधां प्रति श्रीकृष्णस्य व्याकुलतायाश्च वर्णनं कृतम्। **चतुर्थाङ्के** राधाकृष्णयोः शृङ्गारलीलानां वर्णनम् अस्ति। **पञ्चमाङ्के** श्रीकृष्णः राधायाः कृते संदेशयुक्तं पत्रं प्रेषयति। **षष्ठाङ्के** श्रीकृष्णं

प्रति राधायाः अनुरागः वर्णितः। श्रीकृष्णस्य संदेशं श्रुत्वा राधा कृष्णं प्रति व्याकुला भवति। सप्तमाङ्के राधाकृष्णयोः क्रीडाभिः प्रसन्नाः भूत्वा सर्वे भक्तिभावपूर्णं राधाकृष्णयोः जयध्वनिं कुर्वन्ति।

नाटके उच्चपात्राणि संस्कृतेन वदन्ति निम्नपात्राणि स्त्रीपात्राणि च प्राकृतेन वदन्ति। निकुञ्जप्रासादेषु राधाकृष्णयोः विहारस्य रमणीयं चित्रणमपि कविना कृतम्। अस्मिन् प्रसङ्गे कविना क्रमिकरूपेण एकशः सर्वेषां ऋतूनाम् अपि वर्णनं कृतम्। सुबाहुसुबलयोः वार्तालापमाध्यमेन कविः स्वसम्प्रदायस्य श्रेष्ठतामपि प्रतिपादयति।

नाटकस्य नायकः श्रीकृष्णः अस्ति नायिका च राधा। अन्ये पुरुषपात्राणि सन्ति- मंगलमुखः (विदूषकः), विषयसुखः (ब्रह्म), सुबलः (श्रीकृष्णस्य मित्रम्), सुबाहुः (श्रीकृष्णस्य मित्रम्), चित्रकण्ठः (शुकः), शुक्राचार्यः (श्रीकण्ठस्य गुरुः)। स्त्रीपात्राणि सन्ति- यशोदा (श्रीकृष्णस्य माता), ललिता, विशाखा, माधवी, श्यामला (सर्वाः राधायाः सख्यः)। यद्यपि श्रीकृष्णस्तु स्वयमेव परमात्मा अस्ति तथापि नाटके श्रीकृष्णस्य चरित्रचित्रणं शृङ्गारनायकरूपेण कृतम्। श्रीराधा श्रीकृष्णस्य सौन्दर्यं वर्णयति-

**कुवलयदलनीलः कोटिकन्दर्पलीलो,**
**निरुपमगुणशोभा रूपलावण्यशीलः।**
**यदवधिसखिदृष्टश्चित्तचोरः किशोरः,**
**तदवधि सुखदोऽसौ रासचेतश्चकोरः।।6.4।।**

**अन्यत्रापि एवमेव वर्णयति -**

**उन्मीलन्नवनीलनीरदतनुः पीतांबरालंबनो,**
**मंदस्मेरसुधारसेंदुवदनः फुल्लारविन्देक्षणः।**
**भ्रूभंगेण मदं गमं गजवशं कुर्वन्महासुन्दर-**
**श्चित्ते नस्तरलीकरोति मुरलीनादेन नंदात्मजः।।7.7।।**

श्रीकृष्णस्य शृङ्गारलीलानां भक्तिपूर्णं चित्रणम् अस्मिन् नाटके कृतम् अस्ति।

श्रीकृष्णः अपि राधायाः सौन्दर्यस्य वर्णनं करोति-

**किं वृंदा विपिनेश्वरी किमथवा विद्युत्प्रभा भूचरी,**
**किं वा मन्मथमाधुरी किमथवा लावण्यवन्यादरी।**
**सौंदर्यामृतवल्लरी किमथवा राधा सुधामंजरी,**
**केयं कांचनचन्द्रकांतिलहरी संराजते सुन्दरी।।1.22।।**

वयो दृष्ट्या श्रीराधा मध्यानायिका अस्ति। अवस्थादृष्ट्या च स्वाधीनपतिका अस्ति। राधायाः प्रियतमः श्रीकृष्णः सदैव अस्याः समीपे निवसति, सा सदैव प्रसन्ना भवति। राधामाधवनाटके प्रतिनायकस्य योजना न कृता, किन्तु विदूषकस्य योजना तु कृता अस्ति। राधायाः सख्यः सदैव तस्याः हितमेव साधयन्ति। तासां प्रसन्नता तु राधायाः प्रसन्नतायामेव भवति। श्रीकृष्णस्य मित्राणि राधावल्लभसम्प्रदायस्य सिद्धान्तानां प्रचारमेव कुर्वन्ति। चित्रकण्ठः शुकः तस्य गुरुः शुक्राचार्यः द्वौ अपि राधावल्लभसम्प्रदायस्य रसभक्ते एव प्रचारं कुर्वन्ति।

राधामाधवनाटकं भक्तिरसप्रधानं नाटकम् अस्ति। राधावल्लभसम्प्रदायस्य रसभक्तेः स्थापना एवं नाटकस्य मुख्यम् उद्देश्यं वर्तते। यथा अन्येषु सम्प्रदायेषु अस्ति तथैव राधावल्लभसम्प्रदाये अपि श्रीकृष्णः परमात्मा अस्ति, श्रीराधा तस्य चिरसंगिनी वर्तते। यद्यपि श्रीकृष्णः अस्य नाटकस्य नायकः अस्ति राधा च नायिका किन्तु तयोः स्वरूपं शृङ्गाररसप्रधाननाटकानां वीररस-प्रधाननाटकानां वा नायकनायिकावत् नास्ति। भारतीयवाङ्मये राधाकृष्णयोः व्यक्तित्वं विराट्रूपेण प्रकटीकृतम्।

**- प्राचार्यः**
**हंसस्नातकोत्तरमहाविद्यालयः,**
**कोटपूतली (जयपुरम्)**

# आयुर्वेदस्योपादेयता

❑ वैद्यो हरिशरणशाण्डिल्यः

अथर्ववेदस्योपवेदोऽस्ति खलु आयुर्वेदः, तस्मात् तस्य प्रामाणिकता सुसिद्धा प्रासंगिकता च सार्वकालिकी विद्यते परञ्च युगप्रभावाद् अद्यत्वे केचन शालीनबुद्धयो जनाः वैदेशिकानामविचारितमतमन्वगाः लार्डमैयोसदृशैः व्यवस्थापितशिक्षापद्धतिदीक्षिताः तदीयदुष्प्रभावेण भ्रान्ताः वारं वारं प्रश्नमिममुत्थापयन्ति यत् सुविकसितेऽस्मिन् वैज्ञानिकयुगे नित्यनूतनव्याधिव्याधभयाक्रान्ते च विश्वे प्रभाविनिदानौषधशस्त्ररहितस्यायुर्वेदीयज्ञानस्य तत्संभवायाः चिकित्सायाश्च काऽऽवश्यकता कोपादेयता च ?

अत्रेदमुच्यते-आयुर्वेदः केवलं चिकित्साविज्ञानमेव नास्ति अपित्वेषः प्राणैषणापूर्त्तेः सर्वोत्तमं त्रिकालाबाधितं साधनं वर्तते। पुत्रैषणाधनैषणाप्राणैषणासु तिसृषु प्रधाना हि प्राणैषणाऽन्ययोरपि द्वयोरेषणयोराधारभूता भवति। आयुर्वेदस्य प्रथमोद्देश्यं वर्तते किल स्वस्थस्य स्वास्थ्यरक्षणम्।' तत्सिद्धये च निर्मिताः सिद्धान्ताः सार्वकालिकाः विद्यन्ते यथा हि व्यायामः प्राणायामः आसनम्, दिनचर्या, ऋतुचर्या चेति। सुस्वास्थ्याय व्यायामस्याद्यापि तदेव महत्त्वमस्ति यत् सुदूरातीते आसीत्। एवमेव अनेके रोगाः केवलं सम्यक्दिनचर्यापालनाभावाज्जायन्ते। कस्मिन् ऋतौ कौ आहारविहारौ भवेताम्, कस्मिन् ऋतौ को दोषः स्वाभाविकतया ऋतुजन्यप्रभावात् प्रकुपितो जायते, कथं चाहारविहारनियोजनमात्रेण तस्य शमनं क्रियते इति सर्वमायुर्वेदे विस्तरेण लिखितम्। दिने रात्रौ चापि त्रयाणां दोषाणां स्वाभाविककोपो भवति, वयोविशेषे दोषविशेषः भाविककुपितो भवति। एतद् विज्ञाय व्यक्तिः सम्यक् चिन्तनेन व्यवहारेणाचरणेन च स्वास्थ्यरक्षां कर्तुं शक्यते यथोक्तं द्रव्यवर्गीकरणे वैद्यकग्रन्थे -

**किञ्चिद् दोषप्रशमनं किञ्चिद्धातुप्रदूषणम्।**
**स्वास्थ्यवृत्तौ मतं किञ्चित्त्रिविधं द्रव्यमुच्यते।।**

तत्तद्द्रव्यानुरूपं चिन्तनेन वयं स्वस्थाः भवितुं शक्नुमः। इत्थमायुर्वेदीयसिद्धान्तानां स्वास्थ्यरक्षणाय प्रासंगिकत्वं चिरनूतनत्वं सुसिद्धम् वरीवर्ति।

आयुर्वेदस्य द्वितीयोद्देश्यं वर्तते खलु रोगग्रस्तस्य चिकित्सा, प्रयोजनस्यास्य सिद्धये आयुर्वेदे अनेके सिद्धान्ताः सन्ति तेषु चतुर्णामेवोल्लेखो विधीयते दिङ्मात्रदर्शनाय -

**1. निदानपरिवर्जनम्** - यस्मात् कारणात् रोगोत्पत्तिर्भवेत् तत्कारणस्य सेवनवर्जनम् निदानपरिवर्जनं कथ्यते। रोगचिकित्सायाः प्रथमं सूत्रमिदं वर्तते। अद्यापि सिद्धान्तोऽयं सर्वैरेव चिकित्सकैः स्वीक्रियते चिकित्सायां प्रयुज्यते च यथा हि अम्लपित्तरोगो अतितीक्ष्णाम्ल-विदाहि-तैलभृष्ट-अतिमरिचसंस्कृष्टादीनां परित्यागो निदानपरिवर्जनं वावश्यकं चास्ति।

**2. सामान्यविशेषो वा सिद्धान्तः** - अस्मिन् सिद्धान्ते समानेन समानस्य वृद्धिः असमानेन (विशेषेण) असमानस्य ह्रासः क्रियते। अर्थात् शरीरस्य त्रिदोषाणां वृद्धिः क्षयो वा रोगस्य कारणं भवति, सामान्यविशेषसिद्धान्तानुसारं यस्य दोषस्य वृद्धिः भवति तद्विपरीतगुणयुक्तौषधेन आहारेण विहारेण च तस्य

दोषस्य क्षयः करणीयः। तेन दोषाणां साम्यावस्था जायते। एवमेव यस्य दोषस्य क्षयो जातः तस्य क्षयप्राप्तदोषस्य समानगुणयुक्तौषधान्नविहारसेवनेन तस्य पुनः वृद्धिः करणीया। एवञ्च दोषाः साम्यावस्थां प्रपद्यन्ते। अस्योदाहरणं यथा हि वर्तमाने ज्वरस्य तीव्रावस्थायां सन्तापशमनार्थं शीतलजलपट्टिका प्रयुज्यते। विपरीत-विहारस्योदाहरणमिदं सुस्पष्टम्।

**3. संशोधनम् ( संशोधनचिकित्सा )** – यदा कदा शरीरस्य दोषाणां मात्रा अतिशयवृद्धिमुपयाति तथा चौषधान्नविहारेण तेषां प्राप्तवृद्धिदोषाणां ज्ञानं कृत्वा वैद्याः तथा कुर्वन्ति। एषः अतिविशिष्टः प्रभाविचिकित्साविधिः संशोधनचिकित्सोच्यते।

**4. जनपदोद्ध्वंसः** – यदा पर्यावरणं भयावहस्तरं यावत् प्रदूषितं जायते तदा एतादृशाः संक्रामकरोगाः संक्रमन्ति ये हि प्रभूतमानवविनाशस्य कारणं भवन्ति। एभी रोगैः विपुलाः जनपदाः ध्वंसीक्रियन्ते। कोरोनाख्यस्य संक्रामकरोगस्य त्रासदी विभीषिका चास्माभिः अक्षिलक्षीकृतास्ति एव। रोगसंक्रमणस्य कारणानि आयुर्वेदे निगदितानि सन्ति –

**सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्।**
**औपसर्गिकरोगाश्च संक्रमन्ति नरान्नरम्।।**

एतेभ्यो व्यतिरिक्तकारणं संक्रमणस्य नाद्यतनीयैः चिकित्सावैज्ञानिकैः कल्पितम्। अहो महती सूक्ष्मा चिन्तनसरणिः भारतीयमनीषिणाम्।

आविष्कारतः शतवर्षानन्तरमेव अनेकप्रति-जैविकौषधयः (एन्टीबायोटिकमेडिसिन) कालबाह्याः जाताः परञ्च विलोक्यतां पञ्चसहस्रवर्षपूर्वं रेचकरूपेण वर्णिता त्रिफला तदानीन्तनेऽपि काले रेचनं करोति स्म अद्यापि रेचयति। एतादृशानि सहस्रशः उदाहरणानि वर्तन्ते। अनेन विवरणेनायुर्वेदशास्त्रास्योपादेयता प्रासंगिकता च सेत्स्यते। आयुर्वेदे विश्वासः करणीयः, तदुक्तोपदेशाश्चानुकरणीयाः, तेन सर्वेषां मंगलं भवितेति नात्र सन्देहः।

**– चिकित्सकः,**
**चूरूस्थ राजकीयायुर्वेदचिकित्सालये**
**6375356175, 9414466034**

# भारतभानुर्भासते

❑ डा. प्रद्युम्नशर्मा

मनसि मेदिनीमोदे, दत्वा मोदीमादरम्।
इन्द्रसमो नरेन्द्रोऽयं, भारतभानुर्भासते।।1।।
निर्मलञ्च वित्तञ्जातं, सीतारमणरक्षिका।
चकार निर्भरात्मानं, भारतभानुर्भासते।।2।।
कालं कवलितः कालः, कोरोनाख्यविषाणुना।
लोको वेद भिषग्वेद, भारतभानुर्भासते।।3।।
योज्यते येन युगं योगे, खलु धैर्यञ्च धीमताम्।
टीकाकृतं शतं कोटी, भारतभानुर्भासते।।4।।
शान्तिः सदा हि नीतिः,सर्वेषां सममेव च।
पदेनोपकृतं संघं,भारतभानुर्भासते।।5।।
मङ्गलःमनसि लोके, गमनन्तु न निष्फलम्।
पथं प्रदर्शयति गत्वा, भारतभानुर्भासते।।6।।
शुचिर्ज्ञानं पावित्र्यं, जलमन्नं सुभाषितम्।
पुनात्याध्यात्मिकं लोकं, भारतभानुर्भासते।।7।।

# श्रीमद्भागवतपुराणस्य काव्यात्मकसौन्दर्यम्

❑ डॉ. योगिनी एच. व्यास

श्रीमद्भागवतं नाम भारतवर्षस्य प्राचीनतमाया ज्ञानपरम्परायाः युगप्रवर्तकस्य परिणतप्रज्ञमहाकवि-वेदव्यासस्य सर्जकप्रतिभायाः चरमा परमा चाभिव्यक्तिः। कविना श्रीमद्भागवतस्य रचनाद्वारा भारतदेशस्य वाङ्मयविचारभूम्यै अमरत्वस्य प्रदानं कृतम् अस्ति। नैकानां युगानां प्रमुखानाम् आख्यानानां संकलनं संग्रन्थनं च कृत्वा भगवतः कृष्णस्य आदर्शचरित्रगाथां धर्मदर्शन-इतिहास-संस्कृति-ज्ञानमाहात्म्येन सह संयुज्य विपुलकलेवरस्य दार्शनिक-साहित्यिकगौरवयुक्तस्य ग्रन्थरचना कृता। श्रीमद्भागवतं तु पुराणसाहित्यस्य मुकुटमणिः वर्तते। रससमृद्धशैल्यां रसेश्वर-रासेश्वर-व्रजेश्वरश्रीकृष्णस्य विविधानां लीलानां प्रतिपादनम् अत्र अभिव्यज्यते। भागवतकारः **नित्यग्रन्थकौस्तुभे** सांख्ययोगादिदर्शनानाम् अद्वैतवादस्य अपूर्वसमन्वयं कृत्वा परब्रह्मरूपेण प्रतिष्ठापयति। विश्वोत्पत्तेः आरभ्य समाजव्यवस्था कुटुम्बव्यवस्था राजनीतिभूगोल-अर्थव्यवस्था-नीतिशास्त्रतत्त्वचिन्तनादीनां समीक्षणं ग्रन्थेऽस्मिन् प्रस्तौति।

श्रीमद्भागवतस्य वर्ण्यविषयस्य विभूति-वैभव-ऐश्वर्यमहिमादिगुणैः समृद्धत्वं व्यापकत्वं श्रेष्ठरसमय-ग्रन्थरूपेण तं प्रस्थापयति। पुराणस्यास्य आरम्भ एव निगमकल्पतरोर्गलितफलरूपेण प्रशस्तिः दृश्यते। यथा-

**निगमकल्पतरोर्गलितं फलं**
**शुकमुखादमृतद्रवसंयुतम्।**
**पिबत भागवतं रसमालयं**
**मुहुरहो रसिका भुवि भावुकाः।।**

**- भागवतपुराणम् - १/१/३**

पुराणस्यास्य 'इतिवृत्तम्' आरम्भात् अन्तपर्यन्तं सुन्दरतया गुम्फितम्। भगवतः श्रीकृष्णावतारस्य प्रयोजनं वृत्रासुरहिरण्यकशिप्वादीनां दुष्टानां विनाशाय, सज्जनानां रक्षणाय, प्रेममयेभ्यः भक्तेभ्यः परमानन्दप्रदानाय च अस्ति। भागवतस्य दशमस्कन्धे श्रीकृष्णस्य वेणुनादं श्रुत्वैव गोपीनाम् आगमने मुखसन्धिः, तासां यथासमयशीघ्रं स्वगृहपरिवारगमनं प्रतिमुखसन्धिः तासां रासप्रसङ्गे गोपाङ्गनानां गर्वमदशमयितुं श्रीकृष्णस्या-न्तर्हितप्रसङ्गे गर्भसन्धिः, गोपवधूनां महारासप्रसङ्गे निर्वहणसन्धीनां प्रयोगाः चित्रिताः सन्ति।

कस्याश्चिदपि साहित्यकृतेः महनीयतायाः मानदण्डः नायकस्याधारेण निश्चीयते। सामान्यतः श्रीकृष्णः **धीरललितनायकः** अस्ति। तथापि मथुरायां धीरोद्धतरूपेण, द्वारिकायां धीरोदात्तरूपेण, हस्तिनापुरे धीरप्रशान्तरूपेण उल्लिखितः अस्ति। सामान्यतः धर्मवीरः सः शैशवकालस्य प्रियमित्रसुदामामिलनप्रसङ्गे दानवीरः, द्रौपद्याः उत्तरायाः च साहाय्यप्रसङ्गे, दानवीरः दृश्यते।

साहित्यशास्त्रे विवेचकैः रसविषयिणी सूक्ष्मा महत्त्वपूर्णा च मीमांसा कृता अस्ति। **'रस्यते आस्वाद्यते इति रसः'** इति व्युत्पत्तिः प्रसिद्धा एव। श्रीमद्भागवते नवरसानां निरूपणं दरीदृश्यते। भगवतः श्रीकृष्णस्य रासलीलायां द्वारिकाविहारे च शृङ्गाररसस्य, चित्रकेत्वाख्याने (भा.पु. ६/१४/४९-५०) करुणरसस्य, उद्दण्डयदुवंशीयकुमाराणां प्रसंगे (भा.पु. ११/१/१३-१५) हास्यरसस्य, नृसिंहप्राकट्यवर्णने अद्भुतरसस्य, सहस्रार्जुनपरशुरामयोः युद्धप्रसङ्गे तथा अम्बरीष-दुर्वासा-प्रसङ्गे वीररसस्य, हिरण्याक्षस्य च वराहरूपयुक्तस्य भगवतः विष्णोः मध्ये युद्धप्रसङ्गे रौद्ररसस्य, नरसिंहस्य भयङ्कररूपवर्णनप्रसङ्गे

भयानकरसस्य, यात्रासङ्घवर्णने (भा.पु. ५/१३/९, १०) बीभत्सरसस्य, यशोदाकृष्णवर्णनप्रसङ्गे वात्सल्यरसस्य च चित्रणं भागवतकारेण अतीवकौशलपूर्वकं कृतमस्ति।

श्रीमद्भागवतस्य अभ्यासे रुचिरवर्णयोजनायाः ललितपदावलीनां च दर्शनं भवति। भागवतपुराणग्रन्थे गद्यस्य मुक्तकवृत्तगन्धि-उत्कलिकाप्रायचूर्णकादि चतुर्णाम् प्रकाराणां प्रयोगः कृतः अस्ति। पुराणेऽस्मिन् सौन्दर्योत्पादनाय अभिव्यञ्जनावैचित्र्याय च शब्दालङ्काराः अर्थालङ्काराः च प्रयुक्ताः सन्ति। '**सुरोऽसुरो वाप्यथ वानरो नरः**' (भा.पु. ५/१९/८) इति वाक्ये वृत्त्यनुप्रासस्य प्रयोगः दृश्यते। दशमस्कन्धे भगवतः श्रीकृष्णस्य पुत्राणां नामसंकीर्तने नादध्वनिः अद्भुतं चमत्कारम् उत्पादयति। तद्यथा -

**भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा।**
**चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः।।**
**श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश।**
**साम्बः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित्।।**

**- भा.पु. - १०/६१/१०-११**

श्रीमद्भागवतस्य भाषा सरला, सुबोधा, संस्कृता च अस्ति। भागवतं समाधिभाषायां लिखितमस्ति। ग्रन्थे प्रयुक्तैः प्रतीकैः मनुष्यमनः वा सहृदयमनः तपसि, योगे, ब्रह्मणि च एकाग्रं भवेत् सा **समाधिभाषा** उच्यते। श्रीमद्भागवतपुराणे सर्ववेदान्तसारो निरूपितः। भागवतकारस्य लक्ष्यं सत्यतत्त्वस्य प्रचारः, सत्यमाहात्म्यस्य प्रतिपादनं च प्रतिभाति।

**वाक्सत्यं येन प्राप्तं विबुधमणिसमं सर्ववाञ्छाप्रदातृ**
**संपत्सु च महत्सु जलकमलनिभाः धैर्यपूर्णाः प्रयत्नाः।**
**प्रोत्फुल्लज्ञानमग्नाः बुधजनप्रणीते कीर्तनीयप्रसङ्गे**
**चित्ते वाचि क्रियायां सुधिजनहृदयाः ये सदाचारवन्तः।।**
**कर्तुं काव्यं च भव्यं कविकुलमहते यत्सुधीनां प्रहर्षः**
**साङ्गाः वेदाः च सर्वे प्रतिदिनमुषसि वाक्यतत्त्वार्थवेत्ता।**
**श्रेयः स्थेयो विधत्तां क्वचिदपि विषये पुस्तके श्लाघनीये**
**ज्ञानं शिष्यस्य भूत्यै सकलगुणमये ये सदाचारवन्तः।।**

**- गांधीनगरं, गुजरातराज्यम्**



# भावनिर्झरी

❑ डॉ.अञ्जना शर्मा

## गोविन्दाय नमो नमः

गोविन्दाय नमो नमः
राधावराय नमो नमः।
वराह! नारायण! कपिल! मत्स्य!
कूर्म! धन्वन्तरे! मोहिनि!
नृसिंह! वामन! हयग्रीव! हरे!
परशुराम! व्यास! हंस! राम!
नानावताराय निःश्रेयसाय
श्रीकृष्णाय नमो नमः।।
गोविन्दाय .........
पूतनारे! शकटारे! अघारे!
वत्सारे! कंसारे! मुरारे!
गोपाल! गोविन्द! मोहन!
दामोदर! गिरिधर! वंशीधर!
लीलाधराय भक्तजनाय
श्रीकृष्णाय नमो नमः।।
गोविन्दाय .....
दीनानाथ! दीनवत्सल! दीनबन्धो!
गोपीनाथ! गोपीवल्लभ! गोपबन्धो!
राधेश! राधारमण! कुञ्जविहारिन्!
मथुरेश! मथुराधिपते! रासविहारिन्!
लीलाविहारिणे तापहारिणे
श्रीकृष्णाय नमो नमः।।
गोविन्दाय ....

## वृन्दाविपिनं पश्य

रे मनः! वृन्दाविपिनं पश्य।
यमुनातीरे कोकिलकीरे
मन्दसमीरे कुञ्जनिकुञ्जे
विहरति राधामाधवः परमप्रेमधृतद्विविधशरीरः।।
रे मनः ........
ज्ञानिध्येयं योगिगम्यं
भक्तलभ्यं सर्वस्वं
विटपितलेतले क्रीडति नित्यं तत्त्वपरं सच्चिदानन्दम्।।
रे मनः ........
तपति लक्ष्मीर्लुठती मुक्तिः
नृत्यति भक्तिः सदा सर्वदा
परमनुपमं दिव्यमिदं भज
परित्यज्य सर्वविधभुक्तिमुक्तिम्।।
रे मनः ........

## श्रीगोविन्दचरणारविन्दम्

मम तु आधार एव श्रीगोविन्दचरणारविन्दम्
श्रीगोविन्दचरणारविन्दं श्रीगोविन्दचरणारविन्दम्।
योगिनामप्यगम्यं
भक्तानां सर्वस्वम्
अघोद्धारकं पापकर्शनं तापहारिणं शुभदम्।।
मम तु ...........
सुखरूपं सुखाधारः

शर्करा-पिण्डवन्मतम्
सुखं ब्रह्म तु केवलं सुखाश्रयमिदं चरणद्वन्द्वम्।।
मम तु ...........
शेषमहेशगणेशवन्दितं
दिनेशसुरेशादिभिस्समर्चितं
देवैः प्रार्थितं फणिफणार्पितं प्रणतकामदं सुभगम्।।
मम तु ...........
चारुचन्दनचर्चितं
श्रीतुलसीदलसेवितं
गोपीहृदयमण्डितं ध्येयं सेव्यं परमाश्रयम्।।
मम तु ...........

### नित्यगुणो वनमाली

नित्यगुणो वनमाली सखि! हरति चेतांसि नः।
कम्बुग्रीवः श्रीवत्साङ्कः स्फुरदरिदराद्यङ्कितकरः
मधुरस्मितविलसदपाङ्गः तमालश्यामाङ्गद्युतिः।।
नित्यगुणो वनमाली .........
रूपश्रीर्विस्मापितचराचरः मरकततटीपीवरमुरः
क्रीडाताण्डवपण्डितः लीलाकल्लोलवारिधिः।।
नित्यगुणो वनमाली .........

### प्रणमामि श्रीराधागोविन्दम्

प्रणमामि श्रीराधागोविन्दम्
रत्नसिंहासने विराजते नित्यं गौरश्यामं युगलस्वरूपम्।
वामे ललिता दक्षिणे विशाखा पृष्ठे चित्रा इन्दुलेखा
देवी रंग सुदेवी भद्रा तुङ्गभद्रा सुशोभना
सखीभिः सेवितं मृदुस्मितं श्रीप्रियाप्रियतमस्वरूपम्।।
प्रणमामि .............
कुञ्चितकेशं भ्रुकुटिविलासं परस्परं प्रेमवीक्षणं
बर्हापीडं दिव्याभरणं वैजयन्तीं च मालां
रूपमनुपमं दिव्यस्वरूपं वाणी धारयति मौनम्।।
प्रणमामि .............

### गोविन्दस्वरूपम्

चेतो बत हरति हन्त किं करोमि?
माधुर्यादपि मधुरं
सौन्दर्यादपि सुन्दरं
चापल्यादपि चपलं
त्रैलोक्यसौभगं गोविन्दस्वरूपम्।।
चेतो बत .........
मंगलानां मंगलं
पावनानां पावनं
भूषणानां विभूषणं
कान्तं कमनीयं पदे पदे नवं नवम्।।
चेतो बत .........

### चोरय मे मनः

चोरय मे मनः
चोरय मे मनः।
विषयेषु चरन्तं
परोक्षे संचरन्तं
चरणशरणं दास्यन्।।
चोरय मे मनः

पापचौरः तापचौरः
चित्तचौरः चीरचौरः
नवनीतचौरः चौराग्रगण्यः ।।
चोरय मे मनः
न धनं न जनं
न पदं न यशः
स्वीकरोति केवलं मनः
चोरय मे मनः

**हे श्यामे**

तव श्रीचरणकमले प्रणमामि श्यामे हे !
श्रीचरणशरणे एव स्वीकरोतु श्यामे हे !।
अकारणे करोति कृपा
नयने वर्षति करुणा
मम पापराशिं मा गणयतु श्यामे हे !।।
तव श्रीचरणकमले .......
नित्यमाह्लादयति गोविन्दं
वर्धयति प्रेमवैचित्र्यं
मामपि कृपादृष्ट्या विलोकयतु श्यामे हे !।।
तव श्रीचरणकमले .......
गोविन्दराध्या प्रेमागाथा
महाभावस्वरूपा नित्या रम्या
मह्यमपि प्रेमाभक्तिं प्रददातु श्यामे हे !।।
तव श्रीचरणकमले .......

**किशोरीकृपा**

किशोरि ! कृपा ईदृशी भवेत्
यन्मुखे तव नाम सर्वदा तिष्ठेत् ।
तव नाम परमाश्रयः लीला सुमनोहरा
तव धाम सुसेवनीयं कथा कर्णरसायना
मन्मनसि मद्वचसि तव गुणगानमेव सर्वदा भवेत् ।।
किशोरि ! कृपा ...........
तप्तकाञ्चन-गौरवर्णा नीलाम्बरा
दिव्याभरणा कमललोचना वदनाम्बुजा
मन्मनसि मच्चेतसि तव ध्यानमेव सर्वदा भवेत् ।।
किशोरि ! कृपा ...........

**यदा यदा स्मरणम्**

यदा यदा स्मरणं तदा तदा दर्शनम् ।
कृपा तव नित्यमेव वर्षति अनुभूयते मया ।।
गजेन्द्रः स्मरति, तव आगमनं
प्रह्लादः जपति, तव प्राकट्यं
हे गोविन्द ! आह्वयति द्रौपदी वस्त्ररूपं धारितं त्वया ।।
यदा यदा ................
ध्रुवस्तपति, साक्षाद्दर्शनम्
उत्तरा प्रार्थयति, गर्भे रक्षणं
व्रजार्तौ इन्द्रमानमर्दयन् गिरिराजो धारितस्त्वया ।।
यदा यदा ................
तव स्मरणं नैव निष्फलं
तव कृपाया एव तत्संभवनं
कुरु कृपां नाथ ! यद्भवेत् तवैव नित्यस्मरणं मया ।।
यदा यदा ................

**1, गार्गी-निवासः, वनस्थलीविद्यापीठम्,**
**बनस्थली-304022 ( राजस्थानम् )**

# कलौ भागवती कथा

( भवरोगविनाशिनी )

❑ युगलकिशोरभारद्वाजः

महात्मानो विद्वांसो विरक्त्या भक्त्या स्वात्मबोधेन च विलसन्तः सन्तश्चास्मिञ्जगज्जलनिधौ निमज्जतां स्वोद्धाराय च किञ्चिदुपायमजानानामत एव सीदतां विषीदतां च जनानां सद्यः सन्तरणाय काचन सुदृढा नौका स्वरूपा श्रीमद्भागवत्कथा निरूपिता।

बहूनां महात्मनां श्रीमद्भागवतस्याश्रयग्रहणेन भगवदनुकम्पाया प्रकाशः शनैः शनैरन्तरात्मनि विजायते। श्रीमद्भागवतं अधीयानैः शाश्वती शान्तिरवाप्ता। भगवतो वाङ्मयावतारः श्रीमद्भागवतम्।'**इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्**' इति वचनात्। ब्रह्मपदेन त्विह परं ब्रह्म परमात्मेति विश्वात्मा भगवान् हरिः बोद्धव्यः। भागवतस्य निगमकल्पतरुफल रूपेण श्रुतिसारश्च भगवान् श्रीकृष्ण एव। फलत्वरूपेणात्र माधुर्यातिशयः सूच्यते नात्र संशयलेशोऽपि। अत्र भागवते निर्मत्सराणां सतां धर्मो निरूप्यते। निष्कामा एव निर्मत्सरा भवन्ति। भागवताः धर्माः परमहंसानां प्रियाः, त एव ह्यच्युतप्रियाः 'इति व्यासवचनम्। सच्चिदानन्दोपलक्षितं ब्रह्म चात्र विश्वात्मा भगवान् हरिः इति। स एव 'साक्षादनादिनिधनो हरिः' इति निरूपितम्। अत्र जिज्ञासवो मुमुक्षवो, विरक्ता भवभयभीताश्चाधिकारिणः इति सिध्यति। तापत्रयोन्मूलनमिति प्रयोजनं लक्ष्यते। अत्र बोधो मुक्तिः भगवत्प्राप्तिर्वाऽनुभूतिर्वा प्रयोजनमस्येत्येवं स्वीकरणीयम्। महर्षिभिस्तु मनसा ध्यानेन प्रत्यक्षीकृतरूपे वा स्थूले भगवतो विग्रहे रूपे मनः संधारयेद् धिया च शुकेनाप्युक्तम्। अस्मिन् पुराणे मन्वादिराजर्षीणां श्रीरामकृष्णाद्यवताराणां वंशवर्णनं चरित्रवर्णनं दृश्यते। चतुर्दशसु विद्यासु पुराणमप्येका विद्या। पुराणविद्या सनातनी। कल्पादौ ब्रह्मा पुराणं मनसास्मरत्। अस्मिन् ज्ञाने भक्तौ निष्कामधर्मे च समादर एव श्रीभागवतस्य। अत्रोक्तम्-

**'नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः।**
**विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः।।'**

**इति** वचनेन विहितकर्मावहेलनरतानां दुर्गतिप्रतिपादनात्। श्रीमद्भागवतकथाश्रवणमननभक्त्या जगतो नश्वरत्वदर्शनद्वारा ततो वैराग्यमुत्पाद्य परमात्मनि रागोद्वर्धनम् इति फलं प्रत्यक्षमात्मनि अनुभूयते। तमेव कृष्णेऽमलां भक्तिमभीप्समान अध्यवसीयते। भागवतस्य विषयगाम्भीर्यमनुमीयते।

देवभाषायां तु भागवतोपरि बहुशः टीकाः अंकिताः प्रकाशिताः सन्ति।

श्रीमद्भागवतपुराणान्तर्गते नारदसनकादिसमागमः, भक्तिज्ञानवैराग्यवृत्तान्तं वर्णितम्। अस्य श्रवणेन क्लेशनिवृत्तिः भक्तेस्तुष्टिर्ज्ञानविज्ञानवैराग्ययोः पुष्टिर्भवति। भगवत्कथायाः श्रवणकीर्तनयोः निःश्रेयसकरत्वं भगवत्भक्तेर्माहात्म्यवर्णनं विस्तरेण प्रतिपादितम्। भगवद्गुणकर्मवर्णनं महत्त्वं गोकर्णोद्धारणं वर्णितम्। उत्तरागर्भे परीक्षितो रक्षणं, युधिष्ठिरादीनां प्रति धर्मोपदेशः स्तवनं विदुरोपदेशो विस्तरेण सुप्रकाशितम्। परीक्षितजन्मोत्सवः राज्यलाभः दिग्विजयः, परीक्षितो गंगातटे प्रायोपवेशनं, ऋषिसमागमः, शुकागमनं, शुकप्रवचनं, भगवतो विराट्रूपस्य वर्णनम्, सद्योमुक्ति निरूपणं कृतम्। वराहादि-अवताराणां श्रीकृष्णाव-

तारपर्यन्तं चरित्रं वर्णितम्। मथुरायां द्वारकायां च सम्पन्नानां श्रीकृष्णलीलानां वर्णनं भगवत्स्तवनं वैकुण्ठधामवर्णनं, भक्तियोगनिरूपणं विस्तरेण कृतम्।

देहासक्तपुरुषाणां पापादधोगतिकथनं, ध्रुवस्य भगवद्दर्शनं स्तवनं वरं लब्ध्वा राज्यप्रासिश्च विस्तरेण प्रतिपादितम्। पुरञ्जनोपाख्यानं, प्रियव्रतचरितं, भरतस्य मृगयोनौ जन्म पुनः ब्राह्मणकुले जन्म तत्र जडवदाचरणं भद्रकाल्या रक्षणम् रहूगणाय जडभरतस्य ज्ञानोपदेशः मोक्षसाधनकरः वर्तते। **दशमस्कन्धे** श्रीकृष्णावतारोप-क्रमः वसुदेवदेवकीकृता भगवतः स्तुतिः, गोकुले गोचारणं, वृन्दावने गमनं, वेणुगीतं, गोपीगीतं महारासवर्णनं, परीक्षितकृतशंकायाः शुकमुनिना समाधानं, युग्मगीतं मोक्षज्ञानभक्तिप्रदमस्ति। भक्तिहीन-पुरुषाणां निष्ठार्थं पूजाविधानवर्णनं, आत्मनः संसारबन्धो देहाध्यासादिबोधनं जगतो मिथ्यात्वं निरूपितं विस्तरेण। सद्भक्तिप्राप्त्युपायस्य सत्संगमहिमा, भक्तेर्महत्वं, यमनियमादीनां, ज्ञानकर्मभक्तियोगानां वर्णनं, सत्वादि-गुणत्रयवृत्तिनिरूपणं, परमार्थनिरूपणं, परीक्षितो भीतिनिवारणं सुवर्णितम्।

अतो कलौ भागवती वार्ता कथाश्रवणं कृष्णप्राप्तिकरी प्रेमानन्दप्रदायिनी वर्तते। यथोक्तम्-

**श्रीमद्भागवतं पुराणममलं यद् वैष्णवानां प्रियं**
**यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।**
**तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं**
**तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः।।**

**पूर्व- अतिरिक्तनिदेशकः**

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७
डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-
निर्माता
ए इन्फ्रास्ट्रक्चर लिमिटेड
एस्बेस्टोस सीमेन्ट पाइप्स
सस्ता, मजबूत एवं टिकाऊ
सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
एवं
निर्माता
एस्बेस्टोस सीमेन्ट शीट्स
छत एक, लाभ अनेक
उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें
कारखाना : हमीरगढ़ - 311025, जिला भीलवाडा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# विरोधः

❑ डॉ. हर्षदेवमाधवः

यदि
मार्गेषु प्रवाहितं दुग्धं
क्षुत्क्षामकण्ठानां रङ्कशिशूनां मुखेषु
अपतिष्यच्चेत्-
सरोषं त्यक्तहलानि
क्षेत्रेषु कृषिकार्ये व्यापृतानि
अभविष्यं श्चेत्-
सोद्वेगं क्षेत्रेभ्यो बहिः
क्षिप्तशाकान्
नगरे पदातिमार्गेषु
सुप्ता अनिकेता अलप्स्यन्त चेत्-
सुधाखण्ड-कृष्णफलक-प्रमार्जकमयं ज्ञानं
कार्यत्याग (Strike) काले
निरक्षरमस्तिष्कानि प्राप्स्यंश्चेत्-
शिक्षणबहिष्कारसमये
शालास्यूतेषु पिहितानि पुस्तकानि
उद्घाटयितुं
कोऽपि अयतिष्यत,
कार्यालयानां
कार्यं परिहृत्य
निर्गतानां सर्वकारसेवकानां
पञ्जिकाः
कार्यकालेऽपि
उद्घाटिता अभविष्यन्,

यदि
प्रभुत्वाहङ्कारः राज्ञः वा प्रजासेवकानां
स्वस्य आसन्दीं त्यक्त्वा
सर्वग्रन्थिविमोचनार्थं
सन्नद्धोऽभविष्यच्चेत्
तर्हि ......
( कृषकान्दोलनमधिकृत्य लिखितं काव्यम्। )

ॐ
नववर्ष की हार्दिक
शुभकामनाओं सहित :-
कैलाश जोशी
वार्ड अध्यक्ष, भाजपा
वार्ड - 45
24, कृष्णा नगर विस्तार,
इमली फाटक, जयपुर-302015
मो.: 9414440967

# उत्सवः

❑ डॉ. हर्षदेवमाधवः

सञ्चारानुमत्युत्तरं
गमिष्यामि प्रातःकाल एव
देवायतनम्।
समवयस्कमित्रैस्सह
उद्यानशिलाफलके
उपविश्य
भविष्यति परिहासकथा।
ततः
पास्यामि
सर्वैस्सह
'बिट्टु' चायविक्रेतुः
आलपत्रेव चषकद्वयम्।
तदा
ताम्बूलापणिकेन
लखनेन ( लक्ष्मणेन )
बनारसीताम्बूलं
मह्यं दातुं कृतमेव भविष्यति।
विपणिं गत्वा
क्रेष्यामि
पौत्राभ्यां कृते
स्वादुफलानि,
अथ किम्।
मार्गचतुष्क एवास्ति
मिष्टान्नापणम्,
तत्र
अम्बारामः
कटाहे घृतयुक्ताः कुण्डलिनीः
पचन् भविष्यति।
सायंकाले
समवयस्कैर्मित्रैस्सह
उपाहारं करिष्यामि
परिहासकथां कुर्वन्।
रात्रौ
विश्वस्य समग्रं भारं
शरीरेण सह निक्षिप्य
चन्द्रशालायां
स्वप्स्यामि।
अपरेद्युः
पौत्र आगमिष्यति
चायपानेन
तदा मामचेतनं वीक्ष्य
कथयिष्यति
'पितामहः स्वपन् अस्ति
दीर्घनिद्रायाम्।'

# बकासुरः

❑ डॉ. हर्षदेवमाधवः

न कृतं किञ्चिन् निर्घृणं कार्यम्,
तथापि
मुखपट्टैरावृतानि वदनानि।
नास्ति कोऽप्युत्तमर्णः,
तथापि
गृहे निलीना वसामः।
अस्ति
वृक्षेषु वसन्तसौरभम्,
तथापि
पिहितनासापुटाः
वातायनलोहजालिकायाः
पश्यामो
शून्यं रिक्तं नभः।
अन्नभाण्डागारः पूर्णोऽस्ति गेहे
तथापि चिकित्सामनुसृत्य
जीवाम औषधगोलिकाभिः।
नास्ति केनापि वैरम्,
तथापि
सम्बन्धिनामुपेक्षां कृत्वा
सेवामहे
निरीहमज्ञातवासम्।
वार्तापत्रमागच्छति
तथापि
नौत्सुक्यं भवति द्रुतवेगेन स्वीकर्तुम्।
रथ्यायां निर्गच्छन्ति
शाक-फल-विक्रेतारः,
किन्तु
दुर्गाश्रितः कोऽपि नृपवत्
सकरुणं पश्यामो वराकाः।
देवायतनं गन्तुं समयो नास्ति
किन्तु
चिकित्सालयं प्राप्तुं गच्छामः स्थानात् स्थानम्।
स्वभावकृपणास्स्मो वयम्,
तथापि
चिकित्सकेभ्यो
रिक्तधनादेशपत्रं (Cheque)
दत्त्वा
चिकित्सार्थं भिक्षामहे।
'हे राम! हे राम!' इति
न स्मृतः प्रभुः,
तथापि
'राम-डिसीवर' सूचिक्षेपद्रव्यार्थं
मालां जपामः।
महाभारतस्य कोऽपि भीमो बकासुरः
प्रविष्टोऽस्ति
विश्वस्य एकचक्रानगर्यां
स एकमनुष्येन न तुष्टः,
स बुभुक्षितोऽस्ति
असङ्ख्यान्
उदरे समाविश्यापि।।

# स्मृतिग्रन्थेषु पर्यावरणचिन्तनम्

❑ कैलाशचन्द्रबुनकरः

स्मृतिशब्दः द्वयोः अर्थयोः प्रयुक्तो दृश्यते। एकस्मिन्नर्थे अयं शब्दः वेदवाङ्मयात् इतरग्रन्थे, यथा- पाणिनेः व्याकरणम्, श्रौत-गृह्य-धर्मसूत्राणि,, महाभारतम् मनु-याज्ञवल्क्यप्रभृतिग्रन्थैः सम्बद्धोऽस्ति। अपरतः स्मृतेः धर्मशास्त्रस्य च ऐक्यमेव अस्ति।

यथा-मनुना उक्तम्

**' श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः '।**

मनु. 2/10

तैत्तिरीय-आरण्यके ऽपि स्मृतिशब्दस्य प्रयोगोऽभवत्। गौतमवसिष्ठौ स्मृतिं धर्मस्य उपादानं मन्येते।

आरम्भे स्मृति-ग्रन्थाः न्यूनाः आसन्, विश्वसनीयाः स्मृतयः युगयुगान्तराणां कृतयः सन्ति। तासु काश्चित् गद्यभागे काश्चित् मिश्रितभागे अर्थात् गद्यपद्यात्मके तथा अधिकांशतः पद्ये सन्ति।

**धर्मस्य उपादानम्**

धर्मस्य मूलम् उपादानं वेदाः स्मृतयः तथा परम्परागतः शिष्टाचारश्च सन्ति, यथा –

**श्रुतिर्विभिन्नाः स्मृतयो विभिन्ना**
**नैको मुनिर्यस्य वचः प्रमाणम्।**
**धर्मस्य तत्त्वं निहितं गुहायां**
**महाजनो येन गतः स पन्थाः।।**

**पर्यावरणप्रतिष्ठा उत्सर्गश्च –**

जगति पर्यावरणचिन्तनं मानवकल्याणाय आवश्यकमस्ति। जनकल्याणं मन्दिरनिर्माणं तत्र च देवप्रतिमास्थापनम् एवं कूपतडागवाटिकादीनां समर्पणं प्रतिष्ठा-उत्सर्ग नाम्ना उच्यते। स्मृतिषु निहितज्ञानानुसारं देवालयकूपादिविविधधार्मिकसंस्थाः पूर्तधर्मे अन्तर्भवन्ति। शूद्राश्चापि कार्यमिदं कर्तुं प्रभवन्ति स्म। याज्ञवल्क्यटीकामिताक्षरामतानुसारं विधवा अपि पूर्त-धर्मकार्यार्थं धनं व्ययितुं शक्नोति स्म। शबरः स्मृतीनां प्रतिष्ठाविषयकनियमान् 21.114 श्रुताधारितान् मन्यते। विष्णुधर्मसूत्रस्य मतेन (911-1-2) यः मानवः तडागनिर्माणं करोति तस्य पापार्द्धभागः जलनिष्कास-नसमये एव नश्यति। सः सदा प्रसन्नो भवति। वरुणलोके च निवसति। बाणः कादम्बर्यां लिखति यत् स्मृत्यनुसारं जनाः जनसभाभवनं, आश्रम, कूपाः प्रपाः वाटिकाः देवालयान् जलयन्त्रादिनिर्माणं कारयेयुः तेन संसारात् मुक्तिर्भवति। अतः स्पष्टमिदं यत् जनकल्याणाय तैः कृतानि कार्याणि यागादीनि यैः केवलं ब्राह्मणानां लोभो भवति, श्रेष्ठानि मन्यन्ते।

**कूपस्य तडागस्य वा प्रतिष्ठाविधिः –**

शांखायनगृह्यसूत्रम् (512) कूपस्य तडागस्य वा खननं तत् प्रतिष्ठायाश्च विधिं लिखति। यथा शुक्लपक्षे वा कस्यांचित् मांगलिकतिथौ पयसि यवस्य चरुं पक्त्वा दाता 'त्वं नो अग्ने' (ऋग्वेद 4,14-05) 1-25-19 तथा 'उदुत्तं वरुण' (ऋग्वेद 1-24-15) आदि मन्त्रैः सह यज्ञं

कुर्यात् मध्ये दुग्धस्य आहुतिः दीयते मन्त्रोच्चारणं च क्रियते। यज्ञस्यास्य दक्षिणास्ति एकम् अधोवस्त्रयुगलम्, एका धेनुश्च। तत्पश्चात् ब्रह्मभोजो भवति। अन्येषु धर्मशास्त्रसम्बन्धिग्रन्थेषु पर्याप्तवर्णनं कृतम् अस्ति।

इष्टापूर्तौ स्मृतौ धर्मौ तौ शिष्टसम्मतौ। प्रतिष्ठाद्य तयोः पूर्तमिष्टं यज्ञादिलक्षणम्। भुक्तिमुक्तिप्रदं पूर्तमिष्टं भोगार्थसाधनम्।।

कलिकापुराणे (कृत्यरत्नाकर पृष्ठ-10) पूजापाठादिधार्मिकक्रियाकलापैः पदार्थस्य पवित्रता प्रतिष्ठिता भवति। प्रतिष्ठायाः सामान्याभिप्रायो व्यवस्थितकृत्यैः सह जनानां समर्पणम्। प्रतिष्ठायाः विधौ चत्वारो मुख्यांशाः सन्ति।

**1. संकल्पः 2. होमः 3. उत्सर्गः 4. दक्षिणा च**

मन्दिराय उचितशब्दः प्रतिष्ठा वर्तते न तु उत्सर्गः।

**वृक्षमहत्ता वृक्षारोपणादिकं च -**

वृक्षमहत्ता-भारते वृक्षाणां महत्त्वं स्वीकृतम्। ते यज्ञे यूपेभ्यः इध्मास, स्रुवा, जुहू- आदि-यज्ञपात्रेभ्यः उपयोगिनो भवन्ति। तैत्तिरीयब्राह्मणे (1-1-3) सप्तप्रकाराः पवित्रवृक्षाः सन्ति। ते च न्यग्रोध, उदुम्बर-अश्वत्थ-प्लक्षनामानो भवन्ति। यतो हि तत्र गन्धर्वाणां सुराणां च निवासो वर्तते। अन्ये च वृक्षाः स्वहरितपत्रेषु पक्षिभ्यः शीतोष्णं निद्रां ददति। अनेकेषां वृक्षाणां हरितपत्राणि (आम्राशोकादीनां) अद्यापि शुभावसरेषु मण्डपेषु द्वारेषु वा योज्यन्ते। हेमाद्रिः ब्रह्मपुराणम् उद्धृत्य लिखिति यत् अश्वत्थ-उदुम्बर-प्लक्ष-आम्र न्यग्रोधानां शाखाः पत्राणि च 'पञ्च भंगम्' इति कथ्यन्ते। सर्वकृत्येषु तानि मंगलमयानि मन्यन्ते। मनुः (4-29) याज्ञवल्क्यश्च (1/133) स्नातकैः मार्गप्रसिद्धवृक्षाणां परिक्रमणम् आवश्यकम् इति मन्येते। बाणभट्टेन कादम्बर्यां पुत्रकाम्यया स्त्रीणां वृक्षाणां पूजा चर्चिता सा चात्र प्रासङ्गिकतां साधयति।

**वृक्षाणां प्रकाराः तेषां सेवा च-**

महाभारते (अनुशासनपर्व 57/25-32) वृक्षाणां पदपानां च जीवनं प्रभूतं प्रशस्यते। एते पञ्च भागे विभक्ताः सन्ति। 1. वृक्ष 2. लता 3. वल्ली 4. गुल्म 5. त्वक्सारश्च।

अस्मिन् विषये उक्तम् -

**दशकूपसमा वापी दशवापीसमो ह्रदः।**
**दशह्रदसमःपुत्रो दशपुत्रसमो द्रुमः।।**

विष्णुधर्मपुराणे हेमाद्रिः अपि कथयति यत् अश्वत्थ-अशोक-अम्लिका-दाडिमादिवृक्षारोपणेन दीर्घायुः सम्पत्तेः प्राप्तिः पापमोचनं स्त्रीप्राप्तिश्च जायते। वृद्धगौतमः अश्वत्थस्य साम्यं श्रीकृष्णेन सह करोति।

महाभारते अश्वत्थवृक्षस्य पत्रभङ्गं वर्जितं मन्यते। शान्तिपर्वणि 09/42/184-17 वृक्षेषु जीवनं मन्यते। ते सुखदुःखानि अनुभवन्ति। वृक्षाणाम् उपयोगितया प्रभावितो भूत्वा कविः कथयति -

**एक पैर से अडा है, रात दिवस तरु वहीं खड़ा है।**
**झंझावात और प्रवातों में ऋषि**
**ले किसलय मृदु फूल खड़ा है।।**

मत्स्यपुराणानुसारं मन्दिरस्य मण्डपात् पूर्वं

फलदायकवृक्षाणां आरोपणम् आवश्यकमस्ति। दक्षिणतः दुग्धवत् रसयुक्तवृक्षाणां रोपणं कुर्यात्। पश्चिमभागे च कमलैः परिपूर्णः जलाशयो भवेत् उत्तरे च पुष्पवाटिका सरलताडवृक्षाश्च भवेयुः। वसिष्ठधर्म-सूत्रानुसारं यज्ञोपयोगिवृक्षेभ्यः कृषिकर्मोपयोगि वृक्षेभ्योऽतिरिक्तम् अन्येषां वृक्षाणां कर्तनं निषिद्धम्। विष्णुधर्मसूत्रानुसारं फलपुष्पयुक्तवृक्षकर्तन, तत्परेभ्यः जनेभ्यः राज्ञा दण्डप्रदानस्य व्यवस्था अपि कृता विद्यते। हानि-कर्तॄणां जनानां कृते दण्डव्यवस्थां आधुनिक-पर्यावरणविज्ञानम् अपि उचितां साधयति।

**वाटिकादान-विधिः –**

हेमाद्रिः (दानपृष्ठ 1029–1055) वृक्षारोपण-वाटिकासमर्पणेन वृक्षदानेन च जायमानपुण्यस्य विषये सविस्तरं पर्यावरणचिन्तनस्य महत्वम् आख्याति। शाखायनगृह्यपरिशिष्टे (4/10) मत्स्यपुराणे (59) अग्निपुराणे (70) अन्यग्रन्थेषु च वाटिकासमर्पणस्य विधि उपदिष्टः। एष विधिः तडागानां समर्पणविधिषु आधारितोऽस्ति। केवलं मन्त्रेषु भिन्नता अस्ति। वाटिकायाः पवित्राग्निं प्रज्वाल्य स्थालीपाकं कृत्वा दाता विष्णवे स्वाहा इन्द्राग्निभ्यां स्वाहा विश्वकर्मणे स्वाहा तथा ऋग्वेद (3/7/6) मन्त्रान् पठित्वा होमादिं कुर्यात्। वाटिकायां वनस्पतये शतवल्शोविरोह ? नाम मन्त्रः वृद्धिदायको भवति। एतस्मिन् याज्ञिककार्ये दक्षिणायां सुवर्णदानं करणीयम् इति विधानम्। वर्तमाने धर्मसम्मतं, विधिसम्मतं विधानं, स्वीकृत्य पर्यावरणं रक्षितुं समये-समये नैककार्यक्रमानायोज्य वृक्षारोपणं क्रियते। तेषां लालनपालनादिकमपि क्रियमाणमस्ति।

**उपसंहारः –**

भारतवर्षे पर्यावरणचिन्तका विश्वपर्यावरणं प्रति जागरूकाः भूत्वा पर्यावरणसुरक्षायै स्वकीयं सर्वस्वं समर्प्य प्रत्यहं स्वदायित्वं सम्यक्तया निर्वहन्ति अन्यांश्च प्रेरयन्त्यपि, वेदेषु, श्रुतिषु, स्मृतिषु निहितां ज्ञानपरम्पराम् अनुसृत्य अद्यापि तेषां प्रासङ्गिकताम् उपादेयतां च साधयन्ति। समुचितसमये व्यवस्थां चाङ्गीकृत्य वृक्षारोपणं करणीयम्। प्रत्येकं जनः एकस्य वृक्षस्योपयोगित्वं ज्ञात्वा तदनुगुणम् आचरेत्। तेन च मानवजीवने पर्यावरणहितचिन्तकाः सफला भवितुमर्हन्ति।

**– राजकीयः लक्ष्मी-शास्त्री-संस्कृतकॉलेजः,**
**चौथवाडी (जयपुरम्)**
**मो. 9828546123**

**सन्दर्भः –**

मनुस्मृतिः 2/10
याज्ञवल्क्यटीका, 21.114
विष्णुधर्मसूत्राणि, 911-1-2
शांखायनगृह्यसूत्रम्, 5/2
ऋग्वेदः, 4/14/05/3/7/6
कालिकापुराणम् (कृत्यरत्नाकरः) पृष्ठ-1
तैत्तिरीयब्राह्मणम्, 1-1-3
महाभारते अनुशासनपर्व/शान्तिपर्व 57/26-32
हेमाद्रि (वसिष्ठधर्मसूत्र) (दान पृष्ठ 1025-1055)

# श्रीदुर्गासप्तशत्यामनुप्राससर्जना

❑ डॉ. रजनीशकुमारबारहठः

अस्ति श्रीदुर्गासप्तशती शाक्तसम्प्रदायस्य प्रतिनिधिग्रन्थः। प्रत्येकशाक्तमतावलम्बी संस्कृतानुरागी च सप्तशतीविषये प्रायः जानात्येव। नवरात्रसमये सप्तशत्याः पाठः सर्वप्रसिद्धः वर्तते। एवं प्रकारेण सप्तशत्याः धार्मिकमहत्त्वं भारतीयमानसपटले विद्यते। परन्तु न केवलं धार्मिकक्षेत्रे अपितु साहित्यक्षेत्रेऽपि श्रीदुर्गासप्तशती महनीयग्रन्थोऽस्ति। वीररसे, ओजोगुणे, ध्वन्यात्मकतायाम् अनुप्रासे च सप्तशत्याः विशेषप्रभावः परिलक्ष्यते। लघुलेखेऽस्मिन् सप्तशत्यामनुप्राससर्जनामधिकृत्य सोदाहरणं विवेचना प्रस्तूयतेऽत्र –

प्रथम एवाध्याये अनुप्राससौन्दर्यमनुभूयते यथा–

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।।[1]
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये।
महाविद्या महामाया महामेधा महास्मृतिः ।।
महामोहा च भवती महादेवी महासुरी।
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च।
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।।
शंखिनी चापिनी बाणभुशुण्डीपरिघायुधा।
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।।
परा पराणां परमा त्वमेव परमेश्वरी
यत्किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा।
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।।[2]

एतादृशी ध्वन्यात्मकता विरलासु एव रचनासु संदृश्यते। एवमेव अग्रेऽपि अध्यायेषु अनुप्रासप्रयोगः श्लाघनीयः वर्तते–

चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे।
चचाल वसुधा चेलुः सकलाश्च महीधराः ।।[3]
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ।।[4]
स देवीं शरवर्षेण ववर्ष समरेऽसुरः।[5]
युद्ध्यमानौ ततस्तौ तु तस्मात्स्थानान्महीं गतौ।[6]
ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा।[7]
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी।[8]
पपौ पुनः पुनश्चैव जहासारुणलोचना।[9]
गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम्।[10]
काली करालवदना विनिष्क्रान्तासिपाशिनी।[11]
तानि चक्राण्यनेकानि विशमानानि तन्मुखम्।[12]
कालीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला।[13]
उवाच कालीं कल्याणी ललितं चण्डिका वचः ।।[14]
भक्ष्ययाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे।[15]
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम्।[16]
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः।
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके।[17]
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।[18]
विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका
धारयसीति विश्वम्।[19]
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे।[20]
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ।।[21]

– सहायक आचार्य ( संस्कृत )
श्री कल्याण राजकीय कन्यामहाविद्यालय, सीकर
मोबाईल- 09024439907

1 दुर्गासप्तशती 1.76
2 दुर्गासप्तशती प्रथम अध्याय श्लोक 1.76-83
3 दुर्गासप्तशती 2.33-34
4 दुर्गासप्तशती 2.64
5 दुर्गासप्तशती 3.3
6 दुर्गासप्तशती 3.15
7 दुर्गासप्तशती 3.16
8 दुर्गासप्तशती 3.19
9 दुर्गासप्तशती 3.34
10 दुर्गासप्तशती 3.38
11 दुर्गासप्तशती 7.6
12 दुर्गासप्तशती 7.18
13 दुर्गासप्तशती 7.19
14 दुर्गासप्तशती 7.26
15 दुर्गासप्तशती 8.5-6
16 दुर्गासप्तशती 9.12
17 दुर्गासप्तशती 11.10
18 दुर्गासप्तशती 11.24
19 दुर्गासप्तशती 11.33
20 दुर्गासप्तशती 13.3-4
21 दुर्गासप्तशती 13.29

पुस्तक-समीक्षा

# प्रचलति पत्रिकाणां प्रकाशनम्

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

गते वर्षद्वये कोरोनाप्रभृतिवैश्विकमहामारीणां कारणैः पुस्तकानां पत्त्रिकाणां च मुद्रणं काठिन्यग्रस्तमभूत्। मुद्रणे, पुटबन्धने, प्रेषणे च ये प्रतिबन्धा उद्भूताः तैर्मासिक-त्रैमासिक-षाण्मासिकपत्त्रिकाणां प्रकाशने विघ्नानां कश्चन समुदाय उदपद्यत। संवादपत्त्राणि, समाचारपत्त्राणि तु यथापूर्वं प्राकाश्यन्त किन्त्वन्यासां पत्त्रिकाणां प्रकाशने काठिन्यमुद्भूतम्। तादृशेऽपि वातावरणे **'भारती'** सेयं निरन्तरं पाठकानां सविधे प्रापदिति वीक्ष्य बहुभिः पाठकैः सुतरां सन्तोषः प्रकटितः। केवलं मासद्वयस्य पत्त्रिका डिजिटल (आङ्किक) विधया 'ऑनलाइन' माध्यमेन तादृशेषु सङ्कटदिवसेषु पाठकानां सविधे प्रापत्, अन्यथा मुद्रिता पत्त्रिका प्रेषणविभागमाध्यमेन यथावधं पाठकानुपसृतवतीति विदन्त्येव पाठकाः।

संस्कृतस्य कतिपयाः साहित्यपत्त्रिकाः शोधपत्त्रिकाश्चापि यथावधं महामारीसंकटे सत्यपि प्राकाश्यन्त, पाठकांश्च प्रमोदितवत्यः। गतवर्षतस्तु अनेकाः संस्कृतपत्त्रिकाः प्रकाशनं प्रेषणं चारब्धवत्यः। उदाहरणस्वरूपेऽस्माभि**र्नन्दनवनकल्पतरु**नाम्नी अयनपत्त्रिका (षाण्मासिकी) प्राप्ता वि.सं. २०७८ (2078) इत्यस्य दक्षिणायनपत्त्रिकाङ्करूपेण (47 तमोऽङ्कोऽयम्)।

अस्मिन्नङ्के यथावत् जिनदर्शनप्रेष्ठानां मुनिवर्याणां संस्कृतरचनाः, प्राकृतरचनाश्चाऽपि मुद्रिताः, स्व. आचार्यश्रीविजयधर्मधुरन्धरसूरिवर्याणां मयूरदूताख्यं शिखरिणीबद्धं खण्डकाव्यमपि धारावाहिकरूपेण मुद्रितमस्ति। सुप्रथितानां विद्वद्वर्याणां प्रो. अभिराजराजेन्द्रमिश्राणां **'शिशुगीतानि'** प्रकाशितान्यस्मिन्नङ्के। मुनि-शील-चन्द्रविजयवर्यस्य हाइकु-काव्यान्यप्यत्र दृश्यन्ते।

पत्त्रिका सेयं नियमितरूपेण जालपुटमाध्यमेन पाठकानां सविधे प्राप्नुयादित्यस्य कृते विशिष्टाः प्रबन्धाः पत्त्रिकया कृताः इति ज्ञातवन्तः स्युः पाठकाः। इत्थं वैश्विकमहामारीकारणैरुपगतस्य काठिन्यस्योपस्थितावपि संस्कृतस्य पत्त्रिकाभिः शोधपत्त्रिकाभिश्च पाठका उपसृता इति सूचयन्तः प्रमोदामहे। राजस्थानादपि याः पत्त्रिकाः प्रकाश्यन्ते तासां प्रकाशनमुपसृतमिति प्रमोदावहम्। राजस्थानसंस्कृतअकादम्या मुखपत्त्रिका **'स्वरमङ्गला'**ऽपि प्रकाशमाप्तेति विदन्त्येव पाठकाः।

**संस्कृतप्रतिभायाः स्वातन्त्र्यामृतमहोत्सवाङ्कः**

अनेकदशकेभ्यो नियमितरूपेण प्रकाश्यमाना केन्द्रीयसाहित्यअकादम्याः संस्कृतमुखपत्त्रिका 'संस्कृत प्रतिभा' तु सुविदितैव संस्कृतजगति। सेयं त्रैमासिकी गते कालखण्डे सुप्रथितस्य विद्वन्मूर्धन्यस्य कविसार्वभौमस्य पद्मालङ्करणविभूषितस्य वाराणसेयसंस्कृत-विश्वविद्यालय-कुलपतिचरस्य प्रो.अभिराजराजेन्द्र-मिश्रस्य सम्पादकत्वे प्रकाशिता भवतीति जानीयुरेव संस्कृतसेविनः। भारतस्य स्वातन्त्र्यं 75 वर्षपूर्तिं वर्तमाने वर्षे कुर्वाणमस्तीति सम्मानयितुं स्वातन्त्र्यस्यामृतमहोत्सवोऽभिनन्द्यते देशे इति विदन्त्येव देशवासिनः।

इममेव स्वातन्त्र्यामृतमहोत्सवं सम्मानयितुं संस्कृतप्रतिभाया: 81 तमोऽङ्कः स्वातन्त्र्यामृतमहोत्सवाङ्करूपेण प्रकाशित: सपद्येवाधिगत: पाठकै: । अस्मिन्नङ्के सम्पादकवर्येण डॉ. अभिराजराजेन्द्रमिश्रेण स्वकीये सम्पादकीये सविस्तरं वर्णितमस्ति यत् कथं संस्कृतसेविभि: स्वातन्त्र्यसमरे प्रामुख्येण कृतमासीत्। राष्ट्रसेवायै, स्वातन्त्र्यसङ्घर्षाय च कविभिश्च स्वरचनादिना देशवासिन: प्रेरिता इति सम्पादकीये, अस्मिन्नङ्के च ता- इतिहासप्रसिद्धा: काव्यरचना अपि मुद्रिता: सन्ति या: स्वातन्त्र्यसमरप्रेरिका अभूवन्। अस्माकं राष्ट्रगानं '**वन्देमातरम्**' संस्कृतेनैवारभ्यते। महर्षेररविन्दस्य काव्यरचना '**भवानी भारती**' अपि सुप्रसिद्धा। पारतन्त्र्य चिन्तां व्यञ्जयन्ती अप्पाशास्त्री राशिवडेकरस्य काव्यरचना '**पञ्जरबद्ध-शुक:**' अपि सुप्रथित साहित्येतिहासे। इमा: काव्यरचना अस्मिन्नङ्के प्रकाशिता: सन्ति।

अन्यैर्देशप्रथितै: कविवर्यै: स्वातन्त्र्यमभिलक्ष्य या: काव्यरचना विहितास्ता अपि सावधानतया संगृह्य मुद्रिता अस्मिन्नङ्के। कतिपये कविवर्या लोकमिमं त्यक्तवन्त: किन्तु राष्ट्रभक्तिपरास्तेषां काव्यरचना अत्र द्रष्टुं शक्येरन् पाठकै: । अन्येषां कविवर्याणां रचनास्तु मुद्रिता एव ये साम्प्रतं कवयन्ते। अन्या रचना:, कथा:, धारावाहिकोपन्यासादयस्तु प्रकाशिता एवाऽस्मिन् महोत्सवाङ्के।

अस्याऽङ्कस्य विशेषोऽयमुल्लेखनीयोऽस्ति यदस्मिन्नन्ते कतिपयास्तादृश्यो रचना हिन्दी-तेलुगु प्रभृतिभाषाभ्योऽनूद्य संस्कृते प्रस्तुता: सन्ति 'अनुवाद लोक' इति शीर्षकवद्दे परिशिष्टे या विशिष्य पठनीया: सन्ति। हिन्दीभाषाया: काव्यरचनाद्वयम्, तेलुगुभाषाया संस्कृतेऽनूदितं मुद्रितमस्त्यत्र।

! 2021 ई. वर्षस्यान्तिमे ऽँमासे प्रकाशितोऽयमङ्कः स्वातन्त्र्यस्य कौस्तुभजयन्तीमभिनन्दयतीभि: हार्दिकं स्वागतमस्य विधास्यते संस्कृत-जगति। यथा पञ्चविंशतिवर्षपूर्तौ रजतजयन्ती, पञ्चाशद्वर्षपूर्तौ स्वर्णजयन्ती, षष्टिवर्षपूर्तौ हीरकजयन्ती आङ्ग्लभाषाया: सिल्वर जुबिली, गोल्डन जुबिली, डायमन्ड जुबिली इति संज्ञा अवलम्ब्य संमान्यन्तेऽस्माकं देशे तथा पञ्चसप्ततिवर्षपूर्तौ प्लैटिनम जुबिली शब्दमवलम्ब्य '**कौस्तुभजयन्ती**' संमान्येतेति निर्धारितमासीद् गते कालखण्डे, **अशीतिवर्षपूर्तौ** च **अमृतमहोत्सव:**, सहस्रचन्द्रदर्शनमहोत्सवो वा संमान्येतेति प्रथाऽभूत् किन्तु स्वातन्त्र्यस्य 75 वर्षपूर्तौ अमृतमहोत्सव: संमान्येतेति भारतशासनेन निर्धारितमत: सर्वत्रामृतमहोत्सवस्य घोष: प्रसरति। अस्माभिरप्यस्य हार्दं स्वागतं विधीयते।

संस्कृतप्रतिभा: 81 स्वातन्त्र्यामृतमहोत्सवाङ्कः, सम्पादक:- मिश्रोऽभिराजराजेन्द्र:, प्रकाशिका: साहित्य अकादमी, रवीन्द्रभवनम्, 35, फीरोजशाहरोड, नई दिल्ली, पृ.सं. 184, वार्षिक मूल्यम् 150/-

नारी-स्तम्भः

# अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः

❑ डॉ. राजेश्वरी भट्टः

**अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः**
**जाया पत्ये मधुमती वाचं वदतु शान्ति वाम्।**
**मा भ्राता भ्रातरं द्विषन् मा स्वसारमुतस्वसा**
**सम्यञ्च सुव्रतो भूत्वा वाचं वदतु भद्रया।।**

(अथर्व- 30/23)

संयुक्तपरिवारेषु सुखं शान्तिं समरसतामखण्डताञ्च स्थापयितुं घटे सागरमिव विराडर्थं समुद्घाटयत्सु वैदिकमन्त्रेष्वेषु निर्दिष्टायाः संयुक्तपरिवारस्य सदाचारसंहितायाः लोके महतीमुपयोगितामनिवार्यताञ्चाऽनुभूय महर्षिणा वाल्मीकिना रामायणमहाकाव्ये मर्यादापुरुषोत्तमस्य रामस्य परिवारसदस्यानां आदर्श चरित्रमाध्यमेन संयुक्तपरिवाराणाम् अखण्डतायाः समरसतायाः रहस्यमुद्घाटितम्। रामपरिवारस्य सर्वे सदस्या अहमहमिकया वृत्त्या परस्परं समर्पणभावेन त्यागेन, कर्तव्यबोधेन च व्यवहरन्तो धन्यतरान् आत्मनः मन्यन्ते। महाकाव्यस्य प्रारम्भे पुत्राणां भाविजीवनस्योत्कर्षाय तेषां योगक्षेमार्थञ्च पिता सावहितः संलग्नश्च दृश्यते। एवमेव पितुः छत्रच्छायायां वर्धमानाः प्रशिक्षिता चत्वारः पुत्राः पितुराज्ञापालने शुश्रूषणे च पूर्णतः परिनिष्ठिताः सन्ति। तथापि तेषां चतुर्णां मध्ये सत्यनिष्ठस्तेजस्वी धनुर्विद्याविशारदो रामः पितरं प्रति सर्वथा समर्पितः सेवायाञ्च निरत आसीत्।

कथितञ्च -

**सर्वे ज्ञानसम्पन्नाः सर्वे समुदिता गुणैः**
**तेषामपि महातेजो रामः सत्यपराक्रमः।।**
**धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः**

वा.रा./बाल/15/26/26.27

पितरं प्रति रामस्येयं निष्ठा प्रतिकूलतां प्राप्यापि मनागपि विचलिता न जाता। एकतः अयोध्यायां रामस्य राज्याभिषेकमहोत्सवकृते अपूर्व उत्साह आसीत् अपरतः कैकेय्या कुबुद्ध्या, पितुरादेशेन, चतुर्दश वर्षाणां कृते वने निवासः। अविश्वसनीयम् अकल्पनीयं इदमासीत्। किन्तु वज्रादपि कठोरमादेशं श्रुत्वाऽपि पितृभक्तो रामः कथमपि उन्मना नाऽभवत्। पितृभक्तस्य रामस्य कृते पितृसेवा, पितुराज्ञापालनादतिरिक्तं महत्तरं किमपि नासीत्।

कथितञ्च -

**न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम्**
**यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।।**

पितुराज्ञापालने यथा रामोऽतितरं सुखमन्वभवत् तथैव मातुराज्ञाऽपि रामस्य कृते ब्रह्मवाक्यमिव शिरोधार्याऽऽसीत्। 'मातृदेवो भव' इति भावनया भरितस्य रामस्य व्यवहारस्तिसृणां मातॄणां कृते हृदयानन्दकारक आसीत्। विमात्रा कैकेय्या विहितं अन्यायपूर्णं व्यवहारं विधेर्विधानं मत्वा रामो न केवलं यथा तथैव अक्षरशः स्वीकृतवान् अपितु कैकेय्या विहितेन अन्यायेन विप्रकृतं, रोषेण दह्यमानं भ्रातरं भरतमपि कैकेयीं प्रति क्रोधान्न्यवारयत्।

कथितञ्च -

**मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति।**
**मया च सीतया चैव शप्तोऽसि रघुनन्दन।।**

वा. अयो. 112/27

रामायणमहाकाव्ये आदर्शदाम्पत्यजीवनस्य लोकोत्तरं चित्रणं प्राप्यते। आदर्शदम्पतीरूपेण चित्रितौ

सीतारामौ श्रद्धाविश्वासयोः प्रतीकौ अन्योन्यस्य पूरकौ च दृश्येते। प्रासादादुटजपर्यन्तं परस्परं अन्योन्यं भावयन्तौ, सर्वास्ववस्थासु सुखं सन्तोषमन्वभवन्तौ सीतारामौ आनन्देन सुखेन च न्यवसताम्। रामस्य वनगमनसमये जनैः भूयो भूयो वार्यमाणाऽपि रामेण सह वनगमनायोद्यतायाः, रामेण विना प्राणांस्त्यक्तुं दृढसंकल्पवत्याः सीतायाः पतिप्रेम्णः पराकाष्ठा युगयुगेभ्य दाम्पत्यजीवनस्य कृते अनुकरणीय आदर्शो वर्तते।

कथितञ्च –

**अनन्यभावामनुरक्तचेतसं**<br>
**त्वया वियुक्तां मरणाय निश्चिताम्।**<br>
**नयस्व मां साधु कुरुष्व याचनां**<br>
**नातोमया ते गुरुता भविष्यति**<br>
वा. अयो. 27.23

रामायणे वर्णिता परिवारस्य सर्वे सम्बन्धाः परस्पर त्यागेन समर्पणेन संसिक्ताः दृश्यन्ते। अत्र वर्णितो भ्रातृभावो युगयुगेभ्योऽनुकरणीयोऽस्ति। रामेण सह चतुर्दशवर्षाणि यावत् सेवकभावेन सीतारामयो रक्षायै रात्रि जागरणं कुर्वतो लक्ष्मणस्य भ्रातृभक्तिरनन्या अगम्या च वर्तते। एवमेव अयोध्याया आधिपत्यं प्राप्यापि ज्येष्ठभ्रातुः पादुके सिंहासने निक्षिप्य स्वयं दासभावेन चतुर्दश वर्षाणि यापयतो भरतस्य त्यागः अलौकिकोऽस्ति। रामायणमहाकाव्ये महर्षिवाल्मीकिना महता चिन्तनेन मननेन दर्शनेन च प्रस्तुत आदर्शपारिवारिकसम्बन्धानां भव्योऽयं प्रासादः भारतीयैः अपसंस्कृत्या पदक्रमेण संरक्षणीयः।

## हिन्दी अनुवाद

**पुत्र पिता का आज्ञाकारी हो तथा माता को प्रसन्न रखे। पत्नी पति से मधुर वाणी में व्यवहार करे। भाई भाई से कभी द्वेष न करे तथा बहिन भी बहिन के प्रति कल्याण की कामना करे।** – अथर्ववेद 30/2/3

संयुक्त परिवारों में सुख, शान्ति एवं समरसता तथा अखण्डता स्थापित करने के लिए गागर में सागर की भांति विराट् अर्थ का प्रतिपादन करने वाले वैदिक मन्त्रों में निर्दिष्ट संयुक्त परिवार की सदाचार संहिता की लोक में महती उपयोगिता एवं अनिवार्यता का अनुभव कर महर्षि वाल्मीकि के द्वारा रामायण महाकाव्य में मर्यादापुरुषोत्तम राम के परिवार के सदस्यों के आदर्श चरित्र के माध्यम से संयुक्त परिवारों की अखण्डता एवं समरसता का रहस्य उद्घाटित किया है। राम परिवार के सभी सदस्य पहले मैं, पहले मैं इस उदार भावना से परस्पर समर्पण एवं त्याग बुद्धि से तथा कर्तव्य बोध से परस्पर व्यवहार करते हुए अपने को धन्यतर मानते हैं। महाकाव्य के प्रारम्भ में पुत्रों के भावी जीवन के उत्कर्ष एवं योगक्षेम के लिए पिता अत्यन्त सावधान एवं संलग्न दिखाई देते हैं। इसी तरह पिता की छत्रछाया में बढ़ते हुए प्रशिक्षित चारों पुत्र भी पिता की आज्ञापालन एवं सेवा में तत्पर हैं। तथापि उन चारों में भी सत्यप्रतिज्ञ तेजस्वी धनुर्विद्या विशारद

राम पिता की सेवा में सर्वदा एवं सर्वथा समर्पित हैं। पिता के प्रति पितृभक्त राम की अपूर्व निष्ठा प्रतिकूल परिस्थितियों में भी तनिक भी विचलित नहीं हुई। अयोध्या में एक ओर राम के राज्याभिषेक महोत्सव की अपूर्व तैयारियां हो रही थी, वहीं दूसरी ओर कैकेयी की कुबुद्धि एवं दशरथ के आदेश से राम के लिए चौदह वर्ष का वनवास' इस अविश्वसनीय एवं अकल्पनीय एवं वज्र से भी कठोर समाचार को सुनकर भी पितृभक्त राम तनिक भी विचलित नहीं हुए। पितृभक्त राम के लिए पिता की सेवा एवं आज्ञापालन से बढ़कर संसार में कुछ भी नहीं है। पिता की आज्ञा पालन करने में राम जितने सुख का अनुभव करते हैं माता की आज्ञा को भी उसी प्रकार ब्रह्मवाक्य समझकर स्वीकार करते हैं। मातृदेवो भव इसी भावना से युक्त राम का व्यवहार अपनी तीनों माताओं के लिए अनुकूल एवं हृदयानन्दकारक है। विमाता कैकेयी द्वारा किए गये अन्यायपूर्ण व्यवहार को विधि का विधान मानकर न केवल माता के आदेश को अक्षरशः स्वीकार किया अपितु कैकेयी के अनुचित व्यवहार से उन्मना एवं क्रोध से जलते हुए भाई भरत को भी शान्त करने का कार्य किया।

रामायण महाकाव्य में आदर्श दाम्पत्य जीवन का लोकोत्तर स्वरूप प्राप्त होता है। आदर्श दम्पती के रूप में चित्रित राम और सीता श्रद्धा एवं विश्वास के प्रतीक तथा परस्पर एक-दूसरे के पूरक हैं। महल से कुटिया तक एक-दूसरे को प्रसन्न रखते हुए सभी अवस्थाओं एवं परिस्थितियों में सुख एवं सन्तोष का अनुभव करते हुए सीता और राम आनन्द एवं सुख से दाम्पत्य जीवन को धन्य कर रहे थे। राम के वन गमन के समय परिवारजनों के द्वारा बारम्बार रोके जाने पर भी राम के साथ वन जाने के लिए उद्यत, राम के बिना प्राणों को त्याग करने के लिए दृढ़संकल्पवती सीता का त्याग और पति प्रेम युगों युगों तक आदर्श दम्पती के लिए अनुकरणीय है। रामायण में वर्णित सभी पारिवारिक सम्बन्ध परस्पर त्याग एवं समर्पण से संसिक्त हैं। रामायण में वर्णित भ्रातृप्रेम युग-युग तक अनुकरणीय है। राम के साथ चौहद वर्ष पर्यन्त सेवक भाव से राम और सीता की रक्षा के लिए रात भर जागरण करने वाले भाई लक्ष्मण की भ्रातृभक्ति अनन्या एवं अगम्या है। इसी प्रकार अयोध्या का राज्य प्राप्त करने पर भी ज्येष्ठ भ्राता राम की पादुकाओं को सिंहासन पर रखकर स्वयं दासभाव से चौदह वर्ष व्यतीत करने वाले भरत का त्याग अलौकिक है। रामायण महाकाव्य में महर्षि वाल्मीकि के द्वारा अपने गहन चिन्तन, मनन एवं दर्शन से प्रस्तुत आदर्श पारिवारिक सम्बन्धों का यह भव्य प्रासाद भारतीयों के द्वारा अपसंस्कृति के प्रवेश से संरक्षणीय है।

**- पूर्व-संस्कृत-विभागाध्यक्षा,**

**लालबहादुरशास्त्रीकॉलेजः, जयपुरम्**

आयुर्वेद-स्तम्भः

# ग्रीष्मे नियता निद्रा सुखदा

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**हेमन्ते निचितः श्लेष्मा वसन्ते दिनकृद्भाभिरीरितः कायाग्निं बाधते ततः स श्लेष्मजनितान् ज्वर-श्वास-कासादिकान् बहून् रोगान् प्रकुरुते, तस्माद्वसन्ते श्लेष्मणः क्षपणात्मकानि वमनादीनि कर्माणि कारयेत्। काले ह्यस्मिन् जाठराग्नेर्मन्दत्वं विशेषेण जायते। ये हि जनाः गुर्वम्लस्निग्धमधुराणां द्रव्याणां सेवनं दिवास्वप्नञ्चापि कुर्वन्ति ते तु प्रवृद्धेन श्लेष्मणा पीडिताः भवन्ति विशेषेण। अत एव कवलग्रहं व्यायाममुद्वर्तनञ्चापि शरीरबलमभिलक्ष्य यथेष्टं करणीयम्।**

हेमन्त ऋतु में संचित हुआ वसन्त ऋतु में सूर्य की किरणों से प्रेरित हुआ श्लेष्मा कायाग्नि को बाधित करता है, उसके बाद वह श्लेष्मजनित ज्वर-श्वास-कासादि अनेक रोगों को उत्पन्न करता है। इसलिए वसन्त ऋतु में श्लेष्मा का क्षपण करने वाले वमन इत्यादि कर्मों को करवाया जाना चाहिए। इस काल में जाठराग्नि की मंदता विशेष रूप से उत्पन्न होती है। जो लोग गुरु, अम्ल, स्निग्ध एवं मधुर द्रव्यों का सेवन करते हैं तथा दिन में शयन भी करते हैं वे तो बढ़े हुए श्लेष्मा से विशेष रूप से पीड़ित होते हैं, इसलिए कवलग्रह (मुख में श्लेष्मा को दूर करने वाले द्रव्यों को धारण करना), व्यायाम करना एवं उद्वर्तन (उबटन) भी शरीर के बल को ध्यान में रखकर यथेष्ट रूप से करना चाहिए।

**ये हि श्वासरोगेण पीडिताः भवन्ति तैस्तु धूममप्यावश्यकमपेक्षितं वा यदि भवेत्तर्हि भिषङ्निर्देशेन तु करणीयमेव (यथा हि वर्तमानकाले श्वासरोगेण पीड़िताः जनाः 'पफ' इति नामकं भेषजं विशिष्टेनैकेनोपकरणेन मुखमार्गेण गृह्णन्ति तथैवायुर्वेदीयधूमस्वरूपकं भेषजं नासिकया गृह्णीयात्)।**

जो लोग श्वासरोग से पीड़ित होते हैं उनके यदि आवश्यक हो अथवा अपेक्षित हो तो वैद्य के निर्देश से उनके द्वारा धूमपान (औषधीय धूम का सेवन) किया जाना चाहिए (जिस प्रकार से कि वर्तमान काल में पफ नामक भेषज को एक विशिष्ट उपकरण के द्वारा मुखमार्ग से ग्रहण करते हैं उसी प्रकार से आयुर्वेदीय धूमस्वरूपक भेषज को नासिका से ग्रहण किया जाना चाहिए)।

**एप्रिलमासे तु तीक्ष्णतरभावमापद्यमाना उत्तरायणे गमनशीलस्य भगवतः भास्करस्य गभस्तयः भूमावृजुस्वरूपेण पतन्त्यत एव परिहरणीयाः। विहारक्रमे त्वाहारं विहाय शरीरेण क्रियमाणानां सर्वेषां कर्मणामवरोधो भवत्यत एव तेषामवधानतया सम्पादनं करणीयं वर्तते। विहारस्वरूपात्मिकायाः निद्रायाः सेवनमवधानतया पूर्णकालप्रपूर्तिपूर्वकन्त्वावश्यकम्। आहार-निद्रा-ब्रह्मचर्य-**

**व्यायामात्मकानामेतेषां सर्वेषां सेवनं कालेऽस्मिन्नियतरूपेण करणीयम्, विशेषेण तु समुचितं निद्रासेवनं सुखदं भवति।**

अप्रैल माह में तो तीक्ष्णतर भावों को प्राप्त करती हुई उत्तरायण में गमनशील भगवान् भास्कर की किरणें भूमि पर सीधी गिरती हैं, अतः वे परिहार करने योग्य होती हैं। विहारक्रम में तो आहार को छोड़ कर शरीर के द्वारा किए जाने वाले सभी कर्मों का अवरोध (ग्रहण) हो जाता है, अतः उन कर्मों का सावधानीपूर्वक सम्पादन किए जाने योग्य होता है। विहारस्वरूपक निद्रा का सेवन तो सावधानी से पूर्ण काल की पूर्तिपूर्वक करना आवश्यक होता है। आहार, निद्रा एवं ब्रह्मचर्य तथा व्यायामस्वरूपक इन सभी का सेवन इस काल में नियत रूप से करना चाहिए। विशेष रूप से तो समुचित निद्रा का सेवन सुख देने वाला होता है।

**आहारवन्निद्रापि शरीरधारिणाङ्कृते परमावश्यकी वर्तते, वसन्तकालानन्तरन्त्वेषा ग्रीष्मप्रभावप्रभाविता निद्रा रात्रिकाले बाधिता भवति। अत एव निषिद्धोऽपि दिवास्वप्नः ग्रीष्मे त्वादानरूक्षाणां जनानां शरीरेषु मारुते वर्धमाने सति मारुतापहः सन्तर्पकः बलावह ऊर्जस्करः सुखदश्च भवति। आचार्यश्चरकः कथयति यत् -**

**निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्।**
**वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च।।**
**च.सू.21/34।।**

आहार की तरह निद्रा भी शरीरधारियों के लिए परमावश्यक होती है। वसन्तकाल के बाद में तो यह ग्रीष्म के प्रभाव से प्रभावित निद्रा बाधित होती है। इसलिए निषिद्ध भी दिवास्वप्न (दिन में शयन करना) ग्रीष्म ऋतु में तो आदानकाल से रूक्ष हुए लोगों के शरीरों में वायु के वर्धित होने पर वायु को दूर करने वाला, संतर्पण करने वाला, बल को प्राप्त करवाने वाला, ऊर्जस्कर और सुखद होता है। आचार्य चरक कहते हैं कि सुख-दुःख, पुष्टि-कृशता, बल-अबल, वृषता-क्लीबता, ज्ञान-अज्ञान, जीवन का होना और जीवन का न होना ये सब निद्रा के आश्रित (अधीन) हैं।

**दिवा सर्वे प्राणिनः स्व-कार्येषु निरताः प्राणैषणायाः धनैषणायाश्च परिपालनङ्कुर्वन्ति। निशागमने तु निद्रावशीभूताः भवन्ति जनाः। धर्मशास्त्रेष्वपि निर्दिष्टं यत् -**

**अहोरात्रे विभजते सूर्यो मानुषदैविके ।**
**रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ।।**
**(मनुस्मृतिः, 1.65)**

दिन में अपने अपने कार्यों में लगे हुए सभी प्राणी प्राणैषणा एवं धनैषणा का परिपालन करते हैं। रात्रि का आगमन होने पर तो व्यक्ति निद्रा के वशीभूत हो जाते हैं। धर्मशास्त्रों में भी निर्दिष्ट किया गया है कि-

सूर्य मनुष्यों एवं देवताओं के अहोरात्र को विभक्त करता है, उसमें प्राणियों के स्वप्न (शयन) के लिए रात्रि होती है तथा कर्मों की चेष्टा के लिए दिन होता है।

**अत एवायुर्वेदशास्त्रस्य निर्देशानुसारं धर्मशास्त्रस्य च निर्देशानुसारम् एव रात्रौ स्वप्नो विधेयः दिवा च कर्म करणीयम्। सामान्यतया दिवास्वापं न कुर्वीत, यतो हि दिवास्वप्नात् श्लेष्मणः पित्तस्य च प्रकोपो भवति। यथा ह्याचार्यश्चरकः निर्दिशति -**

**ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात् प्रकुप्यतः।**
**श्लेष्मपित्ते दिवास्वप्नस्तस्मात्तेषु न शस्यते।। च.।।**

इसलिए आयुर्वेद-शास्त्र के निर्देशानुसार एवं धर्मशास्त्र के निर्देशानुसार ही रात्रि में स्वप्न (शयन) करना चाहिए और दिन में कर्म करना चाहिए। सामान्यतया दिन में शयन नहीं करना चाहिए, क्योंकि दिन में शयन करने से श्लेष्मा का एवं पित्त का प्रकोप होता है, जैसा कि आचार्य चरक निर्दिष्ट करते हैं कि ग्रीष्म ऋतु को छोड़कर अन्य ऋतुओं में दिन में सोने से कफ और पित्त कुपित हो जाते हैं, इसलिए उन ऋतुओं में दिन के समय सोना श्रेष्ठ नहीं माना जाता है।

**आचार्येणात्र निर्दिष्टं यत् सर्वर्तुषु दिवास्वप्नस्य निषिद्धता वर्तते, किन्तु ग्रीष्मे जन्तवः घर्मेण सन्त्रस्ताः भवन्ति रात्रयश्चातिसंक्षिप्ताः भवन्त्यत एव नियतां निद्रां ग्रहणेऽसमर्थो जनः निर्दुष्टं दिवास्वप्नं कर्तुं शक्नोति। एतादृग्विधाःबहवः जनाः सन्ति ये दिवास्वप्नं कर्तुं शक्नुवन्ति, यथा हि महर्षिश्चरकः कथयति यत् -**

आचार्य ने यहां कहा है कि सभी ऋतुओं में दिवास्वप्न की निषिद्धता है किंतु ग्रीष्म ऋतु में लोग अत्यधिक गर्मी से सन्त्रस्त होते हैं एवं रात्रियाँ अत्यंत संक्षिप्त होती हैं इसलिए नियत निद्रा को लेने में असमर्थ व्यक्ति दोषरहित दिवास्वप्न (दिन में शयन) कर सकता है, इस प्रकार के बहुत से लोग हैं जो दिवास्वप्न कर सकते हैं, जैसे कि महर्षि चरक कहते हैं कि -

**गीताध्ययनमद्यस्त्रीकर्मभाराध्वकर्शिताः।**
**अजीर्णिनः क्षताः क्षीणा वृद्धा बालास्तथाऽबलाः।।**
**तृष्णातीसारशूलार्ताः श्वासिनो हिक्किनः कृशाः।**
**पतिताभिहतोन्मत्ताः क्लान्ता यानप्रजागरैः।।**
**क्रोधशोकभयक्लान्ता दिवास्वप्नोचिताश्च ये।**
**सर्व एते दिवास्वप्नं सेवेरन् सार्वकालिकम्।।**
**धातुसाम्यं तथा ह्येषां बलं चाप्युपजायते।**
**श्लेष्मा पुष्णाति चाङ्गानि स्थैर्यं भवति चायुषः।।**
**ग्रीष्मे त्वादानरूक्षाणां वर्धमाने च मारुते।**
**रात्रीणां चातिसङ्क्षेपाद्दिवास्वप्नः प्रशस्यते।।**
**(च.सू. 21/39-43)**

गीत, अध्ययन, मद्यपान एवं स्त्रीसेवन से कर्शित, संशोधन कर्म से कर्शित, भारवहन से कर्शित एवं अत्यधिक मार्गगमन से कर्शित हुए तथा अजीर्ण के रोगी, उरःक्षत के रोगी, क्षीण व्यक्ति (रसादि धातु जिनके क्षीण हो गए हैं ऐसे व्यक्ति), वृद्ध, बालक तथा दुर्बल, तृष्णा, अतिसार एवं शूलरोग से पीड़ित, श्वासरोग से पीड़ित, हिक्का के रोगी एवं कृश व्यक्ति, ऊंचाई से गिरे हुए, चोट खाए हुए व्यक्ति, उन्मत्त (मदकारी द्रव्य के सेवन से जो मत्त हुए हैं ऐसे व्यक्ति), अत्यधिक यान का सेवन करने

से तथा रात्रिजागरण से थके हुए व्यक्ति, क्रोध, शोक एवं भय से क्लान्त (निष्क्रिय, थके हुए) व्यक्ति तथा जिन को दिन में शयन का अभ्यास है, ऐसे इन सभी व्यक्तियों को दिवास्वप्न का सार्वकालिक अर्थात् सर्वदा ही सेवन करना चाहिए। ऐसा करने से धातुसाम्य होता है तथा इन सब व्यक्तियों के बल की उत्पत्ति होती है। श्लेष्मा अंगों का पोषण करता है (पुष्ट करता है) और आयु की स्थिरता होती है । ग्रीष्म ऋतु में आदान काल के कारण रूक्ष हुए व्यक्तियों के वायु की अभिवृद्धि हो जाने के कारण एवं ग्रीष्मकालीन रात्रियों के अत्यधिक संक्षिप्त (छोटी) होने के कारण ग्रीष्म ऋतु में दिवास्वप्न (दिन में शयन करना) श्रेष्ठ माना जाता है।

**इह गीतकर्शितानां दिवास्वप्नाद्धातुपुष्टौ सत्यामारोग्यम्। अतीसारादिषु च दिवानिद्रयैतेषु विकारेषु मन्दत्वम्भवति रुग्णश्च बलमापादयति। अजीर्णिनिस्त्वजीर्णपाकार्थं दिवानिद्रा; निद्रा हि स्रोतोऽवरोधेनाग्निबलं कृत्वा शीघ्रमाहारं पचति। दिवास्वप्नसात्म्यानां सहसा तत्परित्यागे दोष एव स्यात्।**

**रात्रौ च जागरितानां तज्जनितवातक्षोभशमनार्थं दिवास्वप्नः फलदो भवति। येन हि विशिष्टकारणवशेन रात्रौ जागरणङ्कृतं तेन च जागरितकालादर्धकालात्मक एव दिवास्वप्नः करणीयः ।**

यहां गीत से कृश हुए पुरुषों का दिन में सोने से धातुओं की पुष्टि होने पर आरोग्य होता है और अतिसार आदि में तो दिन में निद्रा लेने से इन विकारों में मंदता होती है तथा रुग्ण बल को प्राप्त करता है अजीर्ण वाले व्यक्ति के तो अजीर्ण के पाचन के लिए दिन में निद्रा ली जानी चाहिए। निःसंदेह निद्रा स्रोतस् के अवरोध से अग्नि के बल को उत्पन्न करके शीघ्र ही आहार को पचाती है, जिन व्यक्तियों के दिन में शयन करना सात्म्य हो उनके सहसा दिवास्वप्न के परित्याग में दोष ही होते हैं । रात्रि में जागरण किए हुए व्यक्तियों के उस रात्रि के जागरण से उत्पन्न वात के क्षोभ के शमन के लिए दिन में शयन करना फलदाई होता है। जिस किसी भी विशिष्ट कारणवश व्यक्ति ने रात्रि में जागरण किया है उस व्यक्ति के द्वारा जितने समय तक जागरण किया गया है उससे आधे समय तक दिन में शयन करना चाहिए, जैसा कि क्षारपाणि कहते हैं -

**यथा हि क्षारपाणिः कथयति-**

**'यावत्कालं न सुप्तः स्याद्रात्रौ स्वप्नाद्यथोचितात्। ततोऽर्धमात्रं तत्कालं दिवास्वप्नो विधीयते' इति; अयं च दिवास्वप्नोऽभुक्तवतामेव; यदुक्तं हारीते- 'भुक्त्वा स्वप्नं न सेवेत सुस्थोऽप्यसुखितो भवेत्' इति; अन्यत्राप्युक्तं व्यायामादिषु दिवास्वप्नविधाने- 'नरान्निरशनान् कामं दिवा स्वापयेत्' इति।**

यथोचित (जितनी अभ्यस्त है उतनी) निद्रा से रात्रि में पुरुष जितने समय तक नहीं सोवे अर्थात् जितना कम सोवे उस से आधे समय तक दिन में शयन किया जाता है और यह दिवास्वप्न भोजन न किए हुए व्यक्तियों के लिए ही है, जैसा कि **हारीत** में कहा गया है- 'भोजन

करके निद्रासेवन नहीं करे, भोजन करके निद्रासेवन करने पर स्वस्थ पुरुष भी असुखी हो जाता है, अन्यत्र भी व्यायाम इत्यादि के स्वरूप में अति परिश्रम करने पर दिन में सोने के विधान में कहा गया है कि भोजन न किए हुए व्यक्तियों को दिन में यथेच्छ रूप से शयन करावे।[1]

**किन्तु ये हि जनाः वित्तैषणायां निरताः रात्रौ प्रतिदिनमेव रात्रिजागरणङ्कुर्वन्ति तैस्तु दिवाऽपि पूर्णकालिका निद्रैव सेवनीया, सा च सप्तहोरात्मिकैव समुचिता।**

लेकिन जो व्यक्ति वित्तैषणा में निरत रहते हैं और रात्रि में प्रतिदिन ही रात्रिजागरण करते हैं उनके द्वारा तो दिन में भी पूर्णकालिक निद्रा का ही सेवन किया जाना चाहिए और वह पूर्णकालिक निद्रा 7 घंटे की ही उपयुक्त रहती है।

**नियमितरूपेण प्रतिदिनं रात्रौ नियतसमये निद्रायुक्तो भवेज्जनः। यद्यपि कियत्कालपर्यन्तं निद्रानिषेवणं करणीयमिति तु परिस्थितिविशेषेऽवस्थाविशेषे च निर्भरितम्, पुनरपि स्वस्थेन वयस्केन जनेन सप्तहोरापर्यन्ता निद्रा पर्याप्तिम् (सन्तुष्टिम्) अभिनिर्वर्तयति। परिस्थितिविशेषं विना दिवास्वापं न कुर्वीत यतोऽसौ स्यात्कफावहः। अनपेक्षितरूपेणा-भिवृद्धेन कफेन बहवः रोगा भवन्ति, अतः व्याधिमुक्त्यनन्तरं नियतरूपेण दिवानिद्रानिषेव-णमपि करणीयम्, भवेन्नाम कस्यचिदपि व्याधेर्मुक्तिः। एतदतिरिक्तं तु गीताध्ययना-दिभिर्यन्निर्दिष्टं तत्र दिवास्वप्नो हि दोषकरो भवति, अन्यथा तु दिवास्वप्नः हानिकर एव भवति। ग्रीष्मेऽपि नियता निद्रैव सुखदा भवति। अत एव दिवा रात्रौ च नियतायाः निद्रायाः पूर्तिः करणीया।**

नियमित रूप से प्रतिदिन रात्रि में नियत समय पर व्यक्ति को निद्रा से युक्त होना चाहिए। यद्यपि कितने समय तक निद्रा का सेवन करना चाहिए यह तो परिस्थितिविशेष अथवा अवस्थाविशेष पर निर्भर करता है फिर भी स्वस्थ वयस्क व्यक्ति के द्वारा 7 घंटे तक की निद्रा संतुष्टि को प्राप्त करवाती है (उत्पन्न करती है)। परिस्थितिविशेष के बिना दिवास्वप्न नहीं करना चाहिए, क्योंकि यह कफ को उत्पन्न करने वाला होता है। अनपेक्षित रूप से बढ़े हुए कफ से अनेक प्रकार के रोग उत्पन्न होते हैं। इसलिए व्याधि की मुक्ति के बाद नियत रूप से दिन में भी निद्रा का सेवन करना चाहिए, चाहे किसी भी व्याधि से मुक्ति हुई हो। इसके अतिरिक्त तो गीत, अध्ययन इत्यादि के द्वारा जो निर्दिष्ट किया गया है उसमें दिन में किया गया शयन दोष उत्पन्न करने वाला नहीं होता है अन्यथा तो दिन में शयन करना हानिकारक ही होता है, इसलिए ग्रीष्म में नियत रूप से ली गई निद्रा सुख देने वाली होती है (ग्रीष्मे नियता निद्रा सुखदा)। अतः दिन एवं रात में नियत निद्रा को पूरा कर लिया जाना चाहिए।

ॐ

नववर्ष की हार्दिक
शुभकामनाओं सहित :-

डॉ. देवेन्द्र कुमार शर्मा

बी.एड., शिक्षा शास्त्री, कॉलेज
एवं सीबीएसई स्कूल

13/2, नगर निगम प्लॉट, मालवीय नगर,
पीथा अस्पताल के पास, जयपुर
मो.: 9414250071, 9414063890

ॐ

नववर्ष की हार्दिक
शुभकामनाओं सहित :-

SKINEVA
CLINIC

डॉ. सुनिल कोठिवाला
डॉ. मयूरी कोठिवाला

11-12, Laxmi Nagar,
Main Tonk Road, Sitabadi,
JAIPUR-302029, Rajasthan
Mob.: 77269 38335

ॐ

नववर्ष की हार्दिक
शुभकामनाओं सहित :-

डॉ. सुरेन्द्र व्यास

शिशु एवं बाल रोग विशेषज्ञ

एच-12, लक्ष्मी नगर,
मोरानी शोरूम के पास, सीताबाड़ी,
टोंक रोड, जयपुर-302029
मो.: 9587511028

ॐ

सभी देशवासियों को
भारतीय नववर्ष की हार्दिक
शुभकामनाओं सहित :-

नरेश शर्मा

पार्षद, वार्ड नं. 145,
नगर निगम, जयपुर ग्रेटर

मो.: 9887259663

ॐ

देश हमें देता है सब कुछ,
हम भी तो कुछ देना सीखें।

**श्री शिवशक्ति प्रोपर्टीज**

रोड़ नं. 5, वीकेआईए, जयपुर

कैलाश अग्रवाल 96023 49123

शंकरलाल विजय 9829679292

सभी प्रकार के प्लॉट, जमीन, फ्लेट, दुकान, फार्म हाऊस खरीदने व बेचने के लिए सेवा का मौका दें।

ॐ

नववर्ष की हार्दिक शुभकामनाओं सहित :-

**अनुभव शर्मा**

**मो. 706205511**

अध्यक्ष – करणी विहार मण्डल, झोटवाड़ा विधानसभा क्षेत्र



ॐ

नववर्ष की हार्दिक शुभकामनाओं सहित :-

**ए वन लैब**

ए कम्प्लीट डायग्नोस्टिक सेन्टर

**डॉ. मुरारी शर्मा**

राजकीय चिकित्सालय के पास,
मुरलीपुरा स्कीम, जयपुर
मो.: 9799837766
फोन: 0141-4014588

ॐ



भारतीय नववर्ष की हार्दिक शुभकामनाओं सहित :-

**D&H CASHONIX Private LimiteD**

Prop. : Sandeep Agrawal (Zandu)

सभी प्रकार के बिजली बिल कैश बैक के साथ भरे जाते हैं।

Shop-G-19, Venkateshwara Complex, Central Spine, Vidhyadhar Nagar, Jaipur

ॐ

नववर्ष की हार्दिक
शुभकामनाओं सहित :-

**SAMBHAV
AFFORDABLE
HOUSING LLP**

ॐ

नववर्ष की हार्दिक
शुभकामनाओं सहित :-

**PRIME
AFFORDABLE
HOUSING LLP**

Punit Karnavat

ॐ

नववर्ष की हार्दिक
शुभकामनाओं सहित :-

**एडवोकेट कांता सोनवाल**

पूर्व पार्षद, बगरू

डायरेक्टर - दी राजस्थान अर्बन
को-ऑपरेटिव बैंक, जयपुर

उपाध्यक्ष - रैगर उत्थान समिति, बगरू

प्रदेश अध्यक्ष - अखिल भारतीय रैगर महासभा

मो.: 9785426059

ॐ

भारतीय नववर्ष की हार्दिक
शुभकामनाओं सहित :-



**गजेन्द्र ज्ञानपुरिया**

कोषाध्यक्ष -
पण्डित दीनदयाल उपाध्याय
स्मृति समारोह समिति राज.

मो: 9829970082

# संस्कृत-समाचाराः

संस्कृतविदुषां डॉ. गंगाधरभट्टमहोदयानां स्मृतौ संस्थापितेन **'राजगंगा चेरिटेबल ट्रस्ट'** द्वारा जयपुरे मोहनपुराक्षेत्रस्य राजकीय-वरिष्ठ-उपाध्याय-संस्कृतविद्यालयस्य छात्राणां कृते 17388/- रूप्यकैः क्रीतानि बृहदास्तरणानि (CARPETS) समर्पितानि। चित्रे न्यासाध्यक्षायै **डॉ. राजेश्वरीभट्ट-** महोदयाम् **'भामाशाहसम्मानपत्रम्'** इत्यनेन सम्मानयन्ती बगरु-क्षेत्रस्य विधायिका **श्रीमती गंगादेवी** विद्यालयस्य प्राचार्यो **डॉ. राजेश शर्मा** प्रभृतयः।



उक्त-ट्रस्टद्वारा जयपुरस्थस्य राजकीय-महाराज-संस्कृत-कॉलेजस्य छात्राणां कृते 48900/- रूप्यकैः क्रीतः "VOLTAS WATER COOLER' इत्यपि समर्पितः।

## केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा त्रिदिवसीयनाट्यमहोत्सवस्य भव्यम् आयोजनम्

भोपालम्। तत्र उद्घाटनं संस्कृतविश्वविद्यालस्य भोपालपरिसरे जातम्। अस्मिन् अवसरे कार्यक्रमस्य अध्यक्षतां कुर्वन् कुलपतिः **श्रीनिवासवरखेडी** अवदत् संस्कृतं नाट्यमंचनस्य साहित्यसौंदर्यस्य च अभावे चैतन्यबोधं प्राप्तुं नार्हति। समारोहेस्मिन् मुख्यः अतिथिः महाभारतचलचित्रिकायां श्रीकृष्णस्य भूमिकां निर्व्यूढवान् **श्रीनितीशभारद्वाजः** कथितवान् यत् भरतस्य नाट्यशास्त्रं वस्तुतः नाट्यसंहिता वर्तते। सारस्वतः अतिथिः पाणिनिसंस्कृतविश्वविद्यालयः उज्जैनस्य, वैदिकविश्वविद्यालय उज्जैनस्य च कुलपतिः **प्रो. सी.जी.विजयकुमारः** रस अभिव्यक्तये नेत्रभंगिमायाः महत्त्वं बोधितवान्। अस्मिन् अवसरे भोपालपरिसरस्य निदेशकः **प्रो.जी.भानुमूर्तिः** अवोचत् यत् मध्यप्रदेशे रंगपंचमी विशेषरूपेण समाचर्यते। एतत्



मंचनं सांस्कृतिकविशेषतानां दृष्ट्या महत्त्वपूर्णम् अस्ति। अस्य महोत्सवस्य संयोजकः **प्रो. रमाकांतपांडेः** कार्यक्रमस्य रूपरेखां विस्तारेण बोधितवान्। लखनऊपरिसरस्य प्राचार्यः **सर्वनारायणझाः** नाट्यमंचने संवादशुद्धतायाः आवश्यकतां प्रोक्तवान्।


भारतीय नववर्ष की
हार्दिक शुभकामनाओं सहित
चेतन कुमावत
जिला अध्यक्ष भाजपा ओबीसी मोर्चा, जयपुर शहर
बनाने पर शीर्ष नेतृत्व का हार्दिक आभार



भारतीय नववर्ष की
हार्दिक शुभकामनाओं सहित

# विनय अग्रवाल
# अंजना अग्रवाल

फ्लैट नं. बी-103, महिमा पनाश सोसायटी,
जगतपुरा, जयपुर-302033
मो: 9810320109

RNI 48760/87

राजस्थान का सबसे अधिक प्रसार संख्या वाला पाक्षिक

# पाथेय कण

## राष्ट्रीय विचारों की जागरण पत्रिका के सदस्य बनें व बनाएं।

पाथेय कण विगत 37 वर्षों से स्वस्थ और निर्भीक पत्रकारिता की परम्परा को जारी रखते हुए राष्ट्रीय एकता और सांस्कृतिक जीवन मूल्यों के विकास में महत्वपूर्ण भूमिका निभा रहा है। वर्तमान में इसकी एक लाख से अधिक प्रतियाँ प्रकाशित होती हैं। यह राजस्थान के 20 हजार गाँवों के साथ सम्पूर्ण देश और विदेश में लाखों पाठकों द्वारा पढ़ा जाता है।

पाथेय कण में विज्ञापन देकर आप अपने संस्थान एवं योजनाओं की जानकारी लाखों पाठकों तक पहुँचा सकते हैं। विज्ञापन दरें निम्न प्रकार हैं -

| | | | |
|---|---|---|---|
| पूर्ण पृष्ठ अंतिम | ₹ 50,000/- | पूर्ण पृष्ठ | ₹ 40,000/- |
| आधा पृष्ठ | ₹ 20,000/- | चौथाई पृष्ठ | ₹ 10,000/- |

**सहयोग राशि**
1 वर्ष 150 रुपये
15 वर्ष 1500 रुपये

## पाथेय कण संस्थान

खाता संख्या- 61088526287 IFSC - SBIN0031772

स्टेट बैंक ऑफ इण्डिया, शाखा- मालवीय नगर, जयपुर -302017

वार्षिक व 15 वर्षीय सदस्यता के लिए आप 7976582011 पर Paytm भी कर सकते हैं।



'पाथेय भवन' 4, मालवीय संस्थानिक क्षेत्र, अग्रसेन मार्ग, मालवीय नगर, जयपुर-302017 (राज.)

संपर्क : 9414447123, 9929722111

patheykan.in · patheykan@gmail.com · patheykan · @patheykan1

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७१०१४

प्रतिष्ठायाम्,